# T.No. 306

# जीर्णोद्धारदशकम्

## (सव्याख्यानम्)

## (Jīrṇoddhāradaśakam - Savyākhyānam)

Copied from a manuscript of
this institute with no. RE 15532.

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T. No. 306.

# जीर्णोद्धारदशकम्

सव्याख्यानम्

॥

copied from a PL. ms.
of this Institute with
No. RE. 15532 (fol. 114–179)

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

114a ॥ शीतांशुमौलिरमणीं श्वेतारण्यनिवासिनीम् ।
ब्रह्मादिदेवजननीं ब्रह्मविद्यामहं भजे ॥

॥ श्रीमद्गुरुभ्यो नमः ॥

श्रीमच्छ्वं[भु]गुमहीपाल गोपुराद्यङ्गभूषणम् ।
देवः काशिकरः ग्राही देयात् भूयश्शुभानि नः ॥ 1

नत्वा शिवं पशुपतिं स्वगुरुं च देवीं-
~~वाचामगोचर~~ शुभवाग्विभवप्रदात्रीम् ।
नानागमोद्धृ(थ)वचनैर्विबुधाभिनन्द्यां
जीर्णोद्धृतिं विरचयामि शुभाय शैवाम् ॥ 2

ब्रह्मादि दुर्ग्रहमपीह शिवागमार्थ-
जालं ग्रहीतुमपि मान्न हि सन्ति सन्तः ।
किन्निम्नगाजलतरङ्ग-चन्द्रबिम्ब-
दानप्रसारितकरः शिशुरेव निन्द्याम् ॥ 3

यस्संसारविरक्तिमान् सपुरुषस्संसारविच्छित्तये
त्यक्त्वान्यत्पशुधर्मजालमखिलं सेवेत देवं शिवम् ।
कुर्याद्वा समथाष्टबाहुस्सुमहाशैलेषु देवस्य तत्
भक्त्या शाश्वत तत्समर्चन तदावासादि जीर्णोद्धृतिम् ॥ 4

॥ इत्युपोद्घातः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रीवृद्धीशनिवास भक्तपरमेशार्च्यादि पुण्यावली

114 b उद्भ्रान्तःकरणो नरं स्वविभवं कृत्वा त्रिभागं मुदा।

भागैकमथात्म जीवनकृते विन्यस्य भागद्वयं

तत् पुण्ये हरिनि ताम्रपात्र निहितं कृत्वा शिवायार्पयेत् ॥ 1

जीर्णोद्धारस्त्रिधायं प्रथममभिहित स्त्वालयादेस्तथाद्यो-

लिङ्गादेस्तु द्वितीयस्तदनु शिवतनो बेरकाद्येस्तृतीयः

तत्राद्ये सप्रभेदाः पुनरथ गदितास्ताद्वितीयस्य ष्टसङ्ख्या

ताः पञ्चोक्तास्त्रितीये शिवमतवचने षट्प्रभेदाः क्रमेण ॥ 2

गर्भालयस्य स्थल निम्नतायामथोभिषेकाम्बुगतौ बिलेषु।

सुधाविहीनेऽपि गुरुर्महेशं मावाह्य कुम्भे स्थलकर्म कुर्यात्

प्रासादः खलु नागरादिभिदया त्रेधा द्विधास्यात्पुनः

स्फोटादौ सति दिग्विकोणच कर्तव्यस्यात्तस्य चैकाङ्गतः।

वैकल्ये सति तत्तदङ्गमखिलं तद्द्रव्यत स्थापयेत्

सर्वाङ्गे यदि तत्समैस्तदधिकैर्वा कल्पयेत्तत्तथा ॥ 4

115 a आचार्यः शिववाक्यात् जीर्ण/पतिते लिङ्गादिबालाभिधं

कृत्वा धाम च मूलशक्तिमपि चात्रावाह्य मूलं ततः।

कृत्वा पञ्जरमध्यगं प्रतिदिनं संपूजनं शान्तिमुक्तं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निष्पन्ने भवने पुनश्च विधिवन्मूले स्वशक्तिन्यसेत् ॥ ५

प्राकार गोपुर समण्टप वास्तुकुण्ड मूलालयस्य परिवारगृहेऽपि-
जीर्णे ।

यत्किञ्चिदङ्ग विकलेसति तत्तदङ्गं सन्धाय सर्वविकले तु
तथोद्धरेच्च ॥

लिङ्गं स्थावरजङ्गमादिभिदया द्वेधा तु पूर्वं पुन-
ष्षड्भेदं क्षणिकादिभेद वशतस्तत्रापि चार्काग्निनौ ।
अष्टाष्टाविंच सप्तधा च नवधा भेदाः क्रमास्युः पुनः
प्रोक्तं मानुषके पुनर्दशविधं धारामुखाद्यैर्भवेत् ॥ ६

जीर्णान्यानि तु षोडशागमवचः प्रोक्तानि लिङ्गान्यपि-
त्याज्यान्यज्ञकृतानि सिन्धुरनदीस्रोतोरिपून्मालकैः ।
कोपावेशवशोद्धृतानि तु पुनर्भग्नात् प्रमाणैस्फुटं
त्यान्येवाथ यथोक्तलब्धमपरं लिङ्गं गुरुः स्थापयेत् ॥ ७

लिङ्गं स्वायम्भुवाख्ये भवति यदि चिरात् जीर्णिता तत्रदोषो-
नास्त्येवोक्ता तु शान्तिर्भवति च विमलस्वर्णपट्टादिबन्धः ।
शैलान्यांशां विहाय अविगणसुरकृता मेवजीर्णोद्धृतिःस्यात्
पीठे त्वङ्गादिहीने त्र्यमुखपरे मानुषे लिङ्गपीठे ॥? ८
शैलं लोहज मृद्दारुज मिति स्यात्तच्च चित्रादिकं-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बेरं जीर्णं विभिन्नं द्रव्यमुदितं दोषावहं पूजने ।
अङ्गादिष्वपि दुष्टता यदि भवेत्तद्द्रव्य तन्मानत-
स्तच्छ्रेष्ठेन तु वागमोक्तविधिना कुर्याच्छुभप्राप्तये ॥ 10

इति जीर्णोद्धारदशकः समाप्तः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रीमच्छैवागमाम्भोधिमवगाह्य कृतं मया ।
जीर्णोद्धारस्य दण्डकं व्याख्यास्ये विस्तरादहम् ॥

तस्य प्रारिप्सित तस्य दण्डकस्याविघ्नेन परिसमाप्तये
गणेशं स्तौति

श्रीमच्छंभुमहीपालगोपुरालङ्कभूषणम् ।
देवः करिकरग्राही देयात् भूः शुभानि नः ॥

श्रीमतः शंभोः शंभुनामकस्य महीपालस्य
116a राज्ञो यत् गोपुरं अरुणाचलालयस्थं शंभुराय
गोपुरमिति प्रसिद्धमिति यावत् । तस्य यदभ्यङ्ग
मधिष्ठानं भूषणमलङ्कारभूतं भूषणशब्दो नित्य
नपुंसकोऽत्र प्रथमान्तः । करिकरग्राही हस्तिहस्त
ग्राहीति प्रख्यातो देवः विनायकः अस्माकं भूयः
अधिकं शुभानि मङ्गलानि देयात् ददात्विति । अनेनारु-
णाचलालये स्थित्वा इदं जीर्णोद्धारदण्डकं कृतमिति
ध्वनितम् । गणपतये गोपुरालङ्कारतावर्णनं जीर्णो-
द्धारस्य प्रासादगोपुरादिविषयत्वं सूचयति ।
अथ शिवप्रासादादिसिद्ध्यै तान्नमस्कुर्वन्
चिकीर्षितं प्रतिजानीते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नत्वा शिवं पशुपतिं स्वगुरुं च देवीं
वाचामनन्तशुभवाग्विभवप्रदात्रीम् ।
नानागमोद्भववचनैर्विबुधाभिनन्द्यां
जीर्णोद्धृतिं विरचयामि शुभाय शैवीम् ॥

शिवं तत्त्वातीतं मुक्तात्मनामपि शिवतत्त्वान्नमस्कार्यत्वं दर्शयति । पशुपतिमिति पशूनां पशुत्व मलरुद्धानामात्मवर्गाणां पतिं रक्षकमित्यर्थः । शिवस्यैव पञ्चकृत्याधिकारित्वं न मुक्तात्मनामिति भावः । स्वगुरुं स्वानुग्राहकं वेदज्ञानगुरुं । अनन्तशुभवाग्विभवप्रदात्रीं अविच्छिन्ननिर्मलवाक्प्रवाहदायिनीं वाचां गिरां देवीं च नमस्कृत्य शैवीं जीर्णोद्धृतिं विरचयामीत्यन्वयः । कीदृशीं विबुधाभिनन्द्यां विद्वत्सन्तोष्यां अविदुषां अस्मिन्नवगाहलेशेन दोष इति भावः ।

अस्य दशकस्य मूलप्रमाणमाह । नानागमोत्थवचनैः मूलागमोपागमसंभववचनैः ज्ञात्वेति शेषः । फलं दर्शयति । शुभायेति शुभं भुक्तिमुक्त्यात्मकम् । पुरुषार्थः । तत्सिद्ध्यर्थमित्यर्थः ।

मूलागमोपागमसंभववचनैः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जीर्णोद्धारस्य शिवलोकादिप्राप्तेः श्रूयमाणत्वादिति-
भावः। विरचयामीत्युक्तम्। पुरुषात् ताहंकार-
ज्ञापनाय दृष्टान्तकर्ता स्वविनयं दर्शयति —

ब्रह्मादिदुर्ग्रहमपीह शिवागमार्थ-
जालं जिघृक्षुमपि मां न हसन्ति सन्तः।
117a किं निम्नगाजलतरङ्गचन्द्रबिम्ब-
दानप्रसारितकरः शिशुरेति निन्दाम्॥

इह सन्तः सत्पुरुषाः ब्रह्मादिदुर्ग्रहं ब्रह्म-
विष्णुप्रमुखैरपि गृहीतुमशक्यं शिवागमार्थजालं
कामिकाद्यागमार्थसमूहं जिघृक्षुं गृहीतुमिच्छुं मामपि
न हसन्ति (न परिहसन्ति), परिहासाभावं दृष्टान्तमुखेन द्रढयति।
किमिति निम्नगाजलतरङ्गचन्द्रबिम्बादानप्रसारित-
करः। निम्नगा नदी तस्याः जलं तत्र यस्तरङ्गः ऊर्मिः।
तद्गतं यत् चन्द्रबिम्बं शशिमण्डलं तस्य आदाने ग्रहणे
प्रसारितकरः प्रवर्तितहस्तः शिशुः बालकः निन्दां
गर्हणं किमिति प्राप्नोति। न प्राप्नोतीत्यर्थः।
अहमपि बालकवत् न निन्द्योऽस्मीति भावः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ननु शैवसिद्धान्तस्य कथं पुरुषार्थहेतुत्वमाशङ्क्य
सकलदर्शितसिद्धान्तानुरोधेन मोक्ष एव
पुरुषार्थ इति सिद्धम् । तस्य च नानामतानुसारेण
बहुविध मुक्तित्वा चिच्छवतत्त्वाख्यस्थानतत्तत्त्व-
॥९६— पदप्राप्तिरूपत्वात् । शैवमोक्ष परप्राप्तिरूपत्वेन
सर्वोत्कृष्टत्वम् । तदुक्तं सिद्धान्तसङ्ग्रहे त्रिलोचन-
शिवाचार्यैः -

चार्वाकाः कौलिका ज्योतिष्कास्साङ्ख्याश्चैव भौतिकाः ।
तन्मात्रसिद्धाः स्मार्ताश्च चक्षुरादीन्द्रिये परे ॥
वैशेषिकास्त्वहंकारे गुणेषु न्यायवादिनः ।
बुद्धितत्त्वे स्थिता बौद्धा गुणतत्त्वेषु त्वार्हतास्थिताः ॥
प्रकृतौ पाञ्चरात्रज्ञाः मन्यन्ते प्रकृतिं हरिम् ।
वेदान्तज्ञाश्च साङ्ख्याश्च योगिनः पुरुषे स्थिताः ॥
पाशुपतास्तु मायाया मविद्यायान्तु महाव्रतः ।
शक्तितत्त्वे तदद्वैत शैवतत्त्वे परे स्थिताः ॥

मृगेन्द्रे -

इत्याद्यज्ञानमूढानां मतमाश्रित्य दुर्धियः ।
अपवर्गमभीप्सन्त खद्योतात्पावकार्थिनः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यत्कैवल्यं पुंप्रकृत्योर्विवेका-

त्त्वोवा सर्वं ब्रह्म मत्वा विरामः ।

यस्याः कांश्चिन्मुक्तय पाशाजन्या-

स्तास्ता स्सर्वा भेदमायान्ति सृष्टौ ॥

शैवेसिद्धौ भान्ति मुक्तिरेवं

मुक्तस्सृष्टौ पुं वरेभ्यो धनाढ्यः ।

निर्वाणार्थानि स्वेष्टविष्टम्यवाप्ता

118a सर्वज्ञानानीशिता सर्वदास्ते ॥

इति च सैवमुक्तिः शिवभजनानन्तरं विना नैव शिव

संभवति। शिवभजनं च, शिवत्वाय शिवभक्त-

पूजन शिवार्चन शिवालयारामादीनि निर्माण

जीर्णशिवालयोद्धारादिरूप इति हृदि निधाय

जीर्णोद्धार शैवधर्मस्यावश्यकर्तव्य इति तं दर्शयति-

य स्संसारविरक्तिमान् स पुरुष स्संसार विच्छित्तये

त्यक्त्वान्यत्सकलं धर्मजालमखिलं सेवेतदेवं शिवम् ।

कुर्याद्धाम मध्याष्टषष्ठि सुमहाक्षेत्रेषु देवस्य तत्

भक्ताराधन तत्समर्चन तदावासादि जीर्णोद्धृतिम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यः पुरुषः संसारविरक्तिमान् अनेकजन्ममरण
रूप संसारानन्तरं दुःखानुसंभव जनित निर्वे-
दना द्विमुक्तिमान्भवति । यथोक्तं मोहमुद्गरे —
पद्मपत्रे यथा तोयं चालो ह्यतीव चञ्चलम् ।
तद्वत् सुचञ्चलं चक्र प्राणिनां भुवि जीवितम् ॥
अस्थिरं यौवनं चक्र द्रव्य मस्थिरमेव च ।
अस्थिरं पुत्रपौत्राभिः रम्भास्तारोवमं यतः ॥
118 b तस्मात् पुत्रकलत्राणि सुहृन्मित्र धनानि च ।
विहाय मोहजालानि कुर्याल्लिङ्गपरिग्रहणमिति
संसारविच्छित्तये
संसारस्याभ्यन्तरनिरूप परमशैव मोहाय
अन्येषान्तन्यूनत्वात् । अन्यदाखिल पशुधर्म
जाल वृतोपवासाध्यानादिरूपं स्वर्गीयत्वा-
त्पत्त्वा देवं दिव्यति मोदते नित्यानन्द-
मनुभवतीति देवः । दिवु क्रीडा विजिगीषा-
व्यवहारद्युति स्तुति मोद मद स्वप्न कान्ति
गतिष्विति धातो रन्तार्थत्वात् । वष्टि प्रकाशात्-
इति शिवः । इत्येवमाणानिति नाम वशकान्तौ
वीति धातो शिवाशब्दो निष्पन्नः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तदुक्तं अभियुक्तैः -

हियातो सिंहशब्दो वकाक्रन्तौ शिवस्मृतः ।

वर्णस्यत्ययसिद्धम् । काश्यपः कश्यको यथेति

तमेवसेवे । तदुक्तं सुप्रभेदे -

शिवधर्मात्परोधर्मो न भूतो न भविष्यति ।

अन्येषु परधर्मेषु स्वर्गायैव फलं हि तत् ॥

इतद्धि शिवशास्त्रेषु भुक्तिमुक्तिप्रदायकम् ।

सर्वशास्त्रं समुद्धृत्य शिवशास्त्रेषु योजयेत् ॥

तथा शिवधर्मोत्तरे -

व्रतानि दानानि तपांसि यज्ञाः

119a सन्यास/तीर्थाश्रम कर्मयोगाः ।

स्वर्गायमेतत् शुभमद्भवच्च

ज्ञानं शुभं शान्तिकरं महार्थम् ॥

अजितागमे -

आदिमध्यान्तनिर्मुक्त स्वभाव विमलप्रभुः ।

सर्वज्ञपरिपूर्णश्च शिवोज्ञेयो शिवागमे ॥

दिक्कालाद्यनवच्छिन्नो वाङ्मनातीतगोचरः ।

निष्कलो निष्कलज्योव (य?) सर्वकृत्सर्वतस्सदा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तज्ज्ञानाद्देवमुक्तिस्यात् तत् भक्त्या वा जनार्दन ।
तत्पूजापि ददात्येव फलमिन्द्रपदादिकम् ॥
पूजितो देवदेवेशो भक्तिं ज्ञानं प्रयच्छति ।
ज्ञानेन भक्तियोगेन विनान्यैर्न कर्मकोटिभिः ॥
प्राप्यते न त्वचिम्मुक्तिं तस्माल्लिङ्गार्चनं त्ववम् ।
लिङ्गार्चनसमो नास्ति धर्मस्त्रिभुवनत्रयम् ॥ इति
तत्सेवा च शिवक्षेत्रवास शिवभक्ताराधन
शिवार्चन शिवालयनिर्माण तच्छीर्णोद्धाररूपेण
पञ्चधा भवति । तत्र शिवक्षेत्रवासोऽष्टषष्टि-
स्वयम्भुस्थानेषु वासः । तदुक्तं स्कन्दकालोत्तरे —
अष्टषष्टि महाक्षेत्रं स्वयम्भुस्थानमुच्यते ।
रुद्रावतारस्थानानि स्वायंभुवानि विनिर्दिशेत् ॥ इति
अष्टषष्टिस्थानानि च वीरागमे प्रतिपादितानि ।
अष्टषष्ट्यश्च स्थानानि शृणु तान् वदतो धन ।
वाराणस्यां महादेवः प्रयागे तु महेश्वरः ॥
नैमिशे देवदेवेशो गयायां प्रपितामहः ।
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिभूषणम् ॥
पुष्करे शो अजो गन्धं विश्वं च विमलेश्वरे ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अट्टहासे महानादं महेन्द्रे तु महाव्रतम् ।
उज्जयिन्यां महाकालं महाकोटे महोत्कटम् ॥
शङ्कुकर्णे महातेजो गोकर्णे तु महाबलः ।
भद्रकोट्यां महायोगी महालिङ्गं स्थलेश्वरे ॥
हर्षके हर्षकश्चैव विश्वमध्ये महेश्वरः ।
केदारे चैक ईशानो रुद्रं रुद्रा हिमालये ॥
स्वर्णाक्षे च सहस्राक्षं विज्ञेयो वृषभध्वजम् ।
भैरवे भैरवाकारं भद्रं भद्रवटे विदुः ॥
रुद्रं कनखले चैव भद्रकर्णे सदाशिवम् ।
देवदारुवने दण्डी चण्डीशं कुरुजाङ्गले ॥
ऊर्ध्वरेता त्रिकजमाया जाङ्गलेश तु कपर्दिनम् ।
कृत्तिवासस्तथैकाम्रे सूक्ष्मा चाम्रेश्वरेश्वरे ॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं विमलेश्वरे ।
रुद्रानं सिद्धेश्वरे चैव गायत्रिं मुक्तिकेश्वरे ॥
विजये चैव काश्मीरे जयन्तं मुकुटेश्वरे ॥
भूतेश्वरे भस्मकायं क्रियावं कैलासकेश्वरे ।
यमलिङ्गं वृषस्थाने कृतलिङ्गं करवीरके ॥
त्रियम्बके त्रिसन्ध्यायां विरजायां त्रिलोचनम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दीप्तं मन्द्रे वरेड्यं पाताले तु पशोःपतिम्।
कारोहणे तु नकुली भाम्बिकायामुमापतिम्।
गङ्गासागरे ममरं ओङ्कारममरेश्वरे ॥
हरिश्चन्द्रे हरश्चैव कुरुश्चन्द्रे तु शङ्करम् ।
जटिलं वामेश्वरे चैव सौम्यश्रीकुक्कुटेश्वरे॥
सप्तगोदावरे भीमं स्वयम्भुं नारवलेश्वरे ॥
जलेश्वरे त्रिशूली च कैलासे त्रिपुरान्तकम्।
कर्णिकारे गणाध्यक्षं कैलासे तु गणाधिपम्॥
हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने ।
गङ्गाद्वारे हिमस्थाने अनलं वडवामुखे ॥
दानवारिं महाल्ये च पराहं विन्ध्यपर्वते।
१६ उग्रं कोटीश्वरे तीर्थं परिष्टं/ लङ्कापुरे ॥
लिङ्गाख्यामुच्यते चैव पाताले हाटकेश्वरम्।
लिङ्गेश्वरे तु वरदं जललिङ्गं जलप्रिये ॥
अष्टषष्टीनि नामानि मयाप्रोक्तानि तेऽधुना। इति
इत्यादि स्वायम्भुवादि वासं कुर्यात् ।
एतेषा मन्येषामपि स्थानानां वासाय स्थलविशेषे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रभेदे प्रतिपादितः ।

लिङ्गाद्धस्तशतं सार्धं शिवक्षेत्रं समन्ततः ।

यस्य तत्रैव वासित्वं शिवलोकस्य कारणम् ॥

यत्तु मानुषके लिङ्गं क्षेत्रमानमिदं स्मृतम् ।

स्वयंभूते सहस्रं स्यादार्षे चैव तदर्द्धकम् ॥

आराधनेन सर्वाणि स्थावराणीतराणि च ।

सिद्धिं प्रयान्त्यसन्देहं प्रभावात्परमेष्ठिनः ॥

तस्मादवश्यं कार्यं शिवक्षेत्रेति सर्वज्ञानोत्तरे ।

शिवक्षेत्रप्रमाणे विशेषोक्तः ।

लिङ्गादर्धशतं क्षेत्रमाचार्यैः स्थापिते भवेत् ।

स्वयंभूते सहस्रं स्यात् ऋषिभिस्तु सहस्रकम् ॥

स्कन्दकालोत्तरे –

रुद्रावतारस्थानानि स्वयंभुवि विनिर्दिशेत् ।

मृतानान्तेषु सर्वेषु शिवक्षेत्रेषु देहिनाम् ॥

भूलोके च महासेन (स्थाने) स्वायंभुवमहाफलम् ।

12| |अर्चनं च जपो ध्यानं समाधिस्थानमेव च ॥

अक्षयं फलमाप्नोति मृतो सायुज्यमाप्नुयात् । इति ।

आदित्यपुराणे । ~~कैलासमध्ये शिवक्षेत्रं~~

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कोशमात्रं शिवक्षेत्रं समन्तात्परमेष्ठिनः ।
देहिनान्तमुपञ्चत्वं शिवसायुज्यकारणम् ॥
मानुषस्थापिते लिङ्गे क्षेत्रमानमितिस्मृतम् ।
स्वायम्भुवे योजनस्या दार्षेचैव तदर्धकम् ॥
पापाचरेति ये नित्यं निरजा मनुजा भुवि ।
तेपि यान्ति शिवस्थाने देवैरपिसुदुर्लभम् ॥
तस्मादावासर्थं कुर्यात् शिवक्षेत्रसमीपतः । इति ।
सूतसंहितायां विष्णुप्रति शिववचनम् –
पापिष्ठानामपि श्रद्धा विहीनानां जनार्दन ।
मुक्तिदं सर्वजन्तूनां शिवक्षेत्रेष्ववर्तनमिति
जन्मान्तरकृतवशात् सताद्दृढाक्षेत्रवासे सति
तद्धकाराधनं तत्समर्चनं दीक्षापुरस्सरं गुरु-
दत्तलिङ्गादावात्मार्थपूजातदावासादीनां शिव
प्रासादावरण मण्डपादीनां लिङ्गबेराणां च मध्ये
जीर्णस्योद्धृति नवीकरणञ्च कुर्यात् ।
तथाचाग्नेयपुराणे –
121b बेरलिङ्गं विमानञ्च मूलपीठं शिवालये ।
शिवसान्निहितो नित्यं नभवेत्तत्र सान्निहितस्थितः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विमाने बेरावरणानि क्षौमो-
त्कृष्टतन्त्वेष्ठतममप्रियंच ।
अर्वाङ्गुलोरत्नि वितस्तिभिर्वा
विमानपोतध्वज वाहनानाम् ॥
स्वर्णादिलेप सुरबिम्बधाम्नां
स्नानगाहायपरैत्य भूयात् ।
निर्माणमाद्यौ महत्फलाय
चतुर्गुण समुद्भवन्तु ... ॥
प्रधानबेरोत्सवबेरधाम्नां
प्रासादसत् गोपुर मण्डपानां ।
फलं सहस्राधिक माद्यमाद्यौ
पश्चात्पर जीर्णमयो विधातुम् ॥
मृद्दारुपाषाण स्वर्णेष्टिकाभि-
र्विमान पार्श्वालय गोपुराणि ।
विसार्मितां पुण्य फलं प्रतिष्ठ
उद्धाताधिकं सर्वफलं क्रमेण ॥
क्षणं क्षणार्धं यो मनि किञ्चावकार्यपरो भवेत् ।
दिव्यंवर्षशतं वक्ष्य शिवलोके महीयते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निष्कं निष्कार्द्धमात्रं वा वित्तं देवार्थमर्पयेत् ।
गोसहस्रफलं लब्ध्वा शिवलोके महीयते ॥
भक्त्या वित्तानुसारेण देवब्राह्मणहेतवे ।
प्रदातव्यं हि यत्नेन यावत् स्वायुषः क्षयः ॥
यावदस्यात्मनः किञ्चिद्यावन्नेन्द्रियकुण्ठता ।
तावत् छिवाय दातव्यं यावन्नैवायुषः क्षयः ॥
122a |सर्वस्वन्दायिनस्स्वायुः शिवकार्ये नियुञ्जतः ।
न विद्मः किं फलं तस्य भवबन्धविमोक्षदः ॥ तः ।
शिवकार्यं विध्यालोच्य शिवद्रव्यापहारकः ।
रौरवं नरकं यान्ति यावदाहूतसंप्लवः ॥
शिवस्वमीति विज्ञाय किञ्चिदप्युपभुञ्जतः ।
मक्षिकादृष्टिमात्रञ्च निरये स्यात् छतं समाः ॥
अज्ञानात्पादमात्रस्य मक्षिकाया शिवस्य तु ।
भुञ्जीतस्वं हि नरको महाघोरशतं समाः ॥
रूपद्रविणसंपत्तिर्येष्ट सन्दृश्यते विभु ।
पूर्वजन्मनि ते नूनं शिवकार्योपकारिणम् ॥
ऊनं च दृश्यते येषु पाणिपादाक्षिकुक्षिषु ।
पूर्वजन्मनि ते नूनं शिवकार्यविघातिनः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यस्यास्ति सोमनोज्ञाङ्गो घनस्तनविराजितः ।
प्रतिमारोपको नूनं पूर्वजन्मनि मानवः ॥
वाजिनो यस्य मातङ्गा वरनार्यश्च संपदः ।
पूर्वजन्मनि स श्रीमान् शिवकार्यपरायणः ॥
प्राकारगोपुरोद्यानवाह्यमण्डपकारिणः ।
नगरग्रामराष्ट्राणां पतयस्युर्नरा भुवि ॥
सुकेशास्सुललाटाश्च सुदृशस्सुदतो नराः ।
122b शिवकार्यरता एव पूर्वजन्मनि मानवाः ॥
सुकर्णास्सुगलस्कन्धास्सूदराश्च सुवक्षसः ।
शिवकार्यपरा एव पूर्वजन्मनि मानवाः ॥
सूरवस्सुपदा जङ्घा सुबाह्वङ्गुल्यो नराः ।
शिवकार्यपरा नूनं पूर्वजन्मनि ते ध्रुवम् ॥
मूकाश्च बधिराः काणाः पङ्गवः कुब्जदेहिनः ।
तान्निश्चिनु विनम्रत्वं शिवकार्यविघातिनः ॥
अन्यधर्मैस्समानं ब्रूयुः शिवधर्मांस्तु ये नराः ।
ते यान्ति नरकान् घोरान् मरुभूमिषु वृश्चिताम् ॥
शिवधर्मान्विनिन्दन्ति शिवभक्तान्हसन्ति ये ।
मर्कटक्रोष्टुमास्ते स्यु बहुकण्ठकितत्वचः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवार्थं शिवभक्तार्थं शिवकार्यपरो नृणाम् ।
दिङ्मात्रमुदितं सूक्ष्मं शिवधर्मप्रवृत्तये ॥
शिवधर्मा ह्यशेषेण वक्तुं शक्या न सूरिभिः ।
धर्मसूक्ष्मो न बोद्धव्यो गुह्यार्थो गहनस्त्वतः ॥
शिवधर्मो हितोऽत्यन्तः दुर्बोधो महतामपि ।
तस्मात्सर्वप्रयत्नेन शिवकार्यपरो भवेत् ॥

शिवधर्मे -

मृद्दार्विष्टकशैलैर्वा यः कुर्या भवनन्नरः ।
त्रिसप्तकुलसंयुक्तः शिवलोके महीयते ॥
मृण्मयात्कोटिगुणितं पुण्यं स्याद्दारुभिः कृते ।
कोटिकोटिगुणं पुण्यं मृत्काष्ठादिष्टकामये ॥
123 मृत्शैलन्त्ययोऽत्यसंज्ञेयं फलमाद्य दिरिद्रयोः ।

शिवधर्मोत्तरे -

स्थपतिस्थापकावृक्षा बालिव द्वि चैककर्मिणः ।
यान्ति रुद्रपदं सर्वे तदध्यक्षाश्च ये नराः ॥
येचापि वृत्तिभूतका शिवायतनकर्मणि ।
तेऽपि यान्ति मृत स्वर्गं शिवधर्मानुभावतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रभेदे-

इष्टिकाशैलजोहैर्वा यः कुर्याद्भुवनं नरः।
काञ्चनेन विमानेन शिवलोके महीयते ॥ इति

कालोत्तरे

जीर्णे देवकृते भूयः प्राप्यते मौलिकं फलम्।
अजीर्णं रक्षयेद्यत्ना जीर्णन्नैव च धारयेत्॥
अजीर्णमुद्धरेद्योऽसौ मोहादज्ञानतोऽपि वा।
पच्यते रौरवे घोरे महाकल्पायुतत्रयम्॥
तस्मात्सर्वप्रयत्नेन त्वजीर्णं पालयेद्बुधः।
जीर्णादिदोषदुष्टं यल्लिङ्गं भूतालयं मतम्॥
तदाश्रिता महाभूताः पिशाचा ब्रह्मराक्षसाः।
वेतालाः क्षेत्रपालाश्च ज्वरापस्मारकादयः॥
दुर्भिक्षं दुर्जयं मारी दुःस्वप्नं दुर्निमित्तकम्।
प्रजापीडा गर्भपीडा नृपपीडा द्विजादिषु॥
निर्घातवातसर्पादि भयमन्दको प्रजायते।
परराष्ट्रभयन्तत्र यत्र जीर्णो महेश्वरः॥
123 b |माहेश्वरगृहास्तत्र ध्वंसयन्ति समन्ततः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गाण्यशीर विहीना स्यु जायते कलहो महान् ।
पशुमारी जनमारी नाशस्सस्येषु जायते ॥
ग्रामादीनि चान्यानि दुष्टानि प्रभवन्ति हि । इति
कामिके

जीर्णादि दोषसंयुक्तं पूजायुक्तञ्च सुस्थितम् ।
जीर्णोद्धारे कृते कर्तुं मौलिकं फलमिष्यते ॥
जीर्णाद्यं पूजितं हन्ति न हन्ति तदपूजितम् ।
तस्मात्समुद्धरेज्जीर्णं यथाशास्त्रं सुरवायचोते ।
मोहशूरोत्तरे

जीर्णे तु संस्कृतिं कर्तुं स्यान्मौलिकं तत्फलं यतः ।?
ततो जीर्णं समुद्धृत्य गुणवद्विन्यसेत्सुधीः ॥
महाभयकरं जीर्णमत्यन्तं क्रूररूपयुक् ।
दोषं करोति बहुधा राष्ट्रे राजनि सर्वथा ॥
दुष्टलिङ्गे स्थिते राष्ट्रे प्रजामारी निरन्तरम् ।
राजा च दुःखशोकान्तः क्षीयते बलवाहनैः ॥
सूक्ष्मे

प्रमादाज्जीर्णिते लिङ्गे पूजानैवेद्यकादिभिः ।
उत्सवादीनि सर्वाणि कृतञ्चेद्दाशसार्थदम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अजिते -

जीर्णं लिङ्गं कुबेरं वा यत्र देशे तु पूज्यते ।

तत्रानावृष्टिजा भीतिर्वर्तते नात्र संशयः ॥

तस्मात्सर्वप्रयत्नेन जीर्णमुद्धृत्य कारयेत् ।

4a ननु जीर्णलिङ्गबेरादि गताशक्तिः कुत्र गच्छतीति चेत् । तदुक्तं कारणे -

आमिषग्रहणार्थाय चोरैश्छिन्ने लिपादिवत् ।

ततः शक्तिर्मण्डलं प्राप्य शाम्यते नात्र संशयः ॥

सूक्ष्मे समाधानमुक्तम् -

बेरलिङ्गाद्गताशक्तिर्वसेदादित्यमण्डले ।

द्वादशाब्दावसाने तु शिवे शक्तिर्विलीयते ॥

तदूर्ध्वं स्थानशक्तिश्च गच्छते परमे पदे ।

शून्यालयमिति प्रोक्तं सर्वदोषसमुद्भवम् ॥

तस्मादुद्धारणाच्छास्त्रदृष्टेन कर्मणा ।

कर्षणादिप्रतिष्ठान्तं यन्नवीकरणं कुरु ॥

सर्वज्ञानोत्तरे

अज्ञात्वा विधिनाच्छास्त्रं कुरुते यस्तु लोभतः ।

कर्तारञ्च तथात्मानमिहामुत्र च नाशयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्मात्सर्वप्रयत्नेन विधिवत्कारयेद्बुधः।
कर्ता कारयिता चैव ततो यान्ति परां गतिम्॥ इति
इत्याद्यनेकागमपुराणवचनैरितरक्रियाकार्यापेक्षया
जीर्णोद्धारस्य चतुर्गुणफलवत्वं शतगुणफलवत्वं
अकरणे प्रत्यवायश्च प्रतिपादितः

॥ इत्युपोद्घातः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इदानीं विभवनिश्चयपूर्वकं सामान्येन

तत्प्रकारमाह

124b शैवक्षेत्रनिवासभक्तपरमेशार्च्यादिपुण्यावली-
शुद्धान्तःकरणो नरः स्वविभवं कृत्वा त्रिभागं मुदा ।
भागं त्वेकमथात्मजीवनकृते विन्यस्य भागद्वयं
तत्पुण्येऽहनि ताम्रपात्रनिहितं न्यस्त्वा शिवायार्पयेत्

शैवक्षेत्रनिवासः - पूर्वोक्ताष्टषष्ट्यादि शिवक्षेत्रनिवासः भक्तपरमेशार्चा शिवभक्तशिवलिङ्गार्चनादि तदुभयमादिर्यस्याः पुण्यावल्याः तया शुद्धं पवित्रमन्तःकरणं मनो यस्य सः । तथोक्तः नरः पुरुषः अनेकसहस्रजन्मान्तरसुकृतवशादेव शिवकार्ये प्रवृत्तिर्भवति । नान्यथेति भावः । स्वविभवं स्वकीयधनं त्रयो भागा अङ्गा यस्य तत्त्रिभागं मुदा । एतादृशं भाग्यं मम सञ्जातं खल्विति भक्त्युपबृंहितसन्तोषेण कृत्वा तत्रैकं भागमात्मजीवनकृते आत्मजीवार्थं विन्यस्य अन्यद्भागद्वयं पुण्येऽहनि पुण्यदिवसे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ताम्रपात्रे पात्रनिहितं कृत्वा शिवायार्पयेत् । शिव-
कार्यार्थं विनियुञ्ज्यात् ।

तदुक्तं शिवधर्मे -

भक्त्या वित्तानुसारेण कुर्यात्प्रासादसञ्चयम् ।
अल्पे महति वा तुल्यं फलमाढ्यदरिद्रयोः ॥
125a वित्तशाठ्येन यः कुर्यात् धर्ममाढ्योऽपि मानवः ।
न स तत्फलमवाप्नोति प्रलोभाक्रान्तमानसः ॥
तस्मात् त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् ।
भागद्वयञ्च धर्मार्थं यतो नित्यं हि जीवितम् ॥
भक्त्या प्रचोदितः कुर्यादल्पवित्तोऽपि मानवः ।
महाविभवसारोऽपि न कुर्याद्भक्तिवर्जितः ॥
सर्वस्वमपि यो दद्यात् शिवभक्तिविवर्जितः ।
न तेन धर्मभुक्स्यात् भक्तिरेवात्र कारणम् ॥ इति ।

तथा सुप्रभेदे -

वित्तं शिवात्मकं कृत्वा शिवमाराधयेन्नरः ।
वित्तशाठ्येन यः कुर्यात् धर्ममाढ्योऽपि मानवः ॥
न तत्फलमवाप्नोति प्रलोभाक्रान्तमानसः ।
तस्मात्त्रिभागं वित्तस्य जीवनार्थमथात्मनः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भागद्वयं च धर्मार्थं अनित्यं जीवितं यतः ।
साधयित्वा च तत्पूर्वं तत्रपात्र तत्स्थापित मिति ॥

मोहशूरोत्तरे –

कालञ्जरे महेन्द्रे वा सह्ये वा मलयेऽपि वा ।
गङ्गातटे समुद्रे वा श्रीशैले सरितान्तटे ॥
पत्रपुष्पफलोपेते मृत्कुशापाचिते कुम्भे ।
125b माहेश्वरजनाकीर्णे सर्वदोषविवर्जिते ॥
सुतिथौ च सुनक्षत्रे सुयोगकरणान्विते ।
संपूज्य देवदेवेशं कुर्याल्लिङ्गपरिग्रह मिति ॥

शिवाचार्यमेदित्यनेन शिवकार्ये विनियुञ्ज्यात्
शिवकार्यञ्च जीर्णशिवालयादुद्धारादिकं विवक्षितम्

तथोक्तं निश्वासे

लिङ्गे पीठे च बेरे च प्रासादे बलिपीठके ।
मण्डपे परिवारे च जीर्णकाले तथोद्धरेत् ॥

कारणे

लिङ्गस्य पिण्डिकायाश्च प्रतिमा आलयस्य च ।
तरुणालयस्य लिङ्गस्य परिवारालयस्य च ॥
प्राकारस्यापि चान्येषा उद्धारश्चोत्तरत्रिया ॥ इति ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथजीर्णोद्धारस्योद्देशं विभागञ्च

करोति ।

जीर्णोद्धारक्रियायां प्रथममभिहित स्त्वालयादेस्तथाद्यो-
लिङ्गादेस्तु द्वितीय स्तदनु शिवतनोर्बेरकादेस्तृतीयः ।
तत्राद्ये सप्तभेदाः पुनरथ गदिता स्तद्द्वितीयेऽष्टसङ्ख्या-
ताः पश्चात्तु तृतीये शिवमतवचनेऽष्टभेदाः क्रमेण ॥

अयं प्रतिपाद्यो जीर्णोद्धारः । प्रथमान्त्रिधा प्रकारेणा-
भिहितः । उक्तः । ततो नवप्रकारेणाह तत्राद्य
स्वालयादेः प्रासादादेः द्वितीयस्तु लिङ्गादेः स्वायं-
भुवादेः तदनु त्रिश्चस्तु शिवतनोः शिवमूर्तिभे-
दस्य बेरकादेः प्रतिमादेः बेरमेव बेरकं तत्र
प्राकारमद्ध्ये आद्ये आलयादिविषये सप्तकं
प्रासाद प्राकार गोपुर मण्टप परिवारालय बास्तु-
जीर्णोद्धार भेदात् । गदिताः उक्ताः द्विती-
ये लिङ्गादिजीर्णोद्धारे अष्टपीठिका मूललिङ्ग
दैविकलिङ्ग आर्षलिङ्ग
बाललिङ्ग स्वायम्भुवलिङ्ग मानुषलिङ्ग बाणलिङ्ग
बालपीठ विषयाष्टभेदाः ख्याताः । पश्चात्
तृतीये तु प्रतिमादिविषये शिवमतवचने:

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवागमवाक्यैः षट्प्रभेदाः बेर चित्राभास पट
भित्ति कुण्ड सिद्धा .. दा .. च । साते क्रमेणोच्यन्त
इत्यर्थः ॥

तत्र प्रथमं स्थलकर्म प्रदर्शयते

गर्भालयस्य स्थलनिम्नतायां मध्योभिषेकाम्बुगतौ बिलेषु ।
सुधाविहीने च गुरुर्महेशमावाह्य कुम्भे स्थलकर्म कुर्यात् ।

गर्भालयस्य गर्भगृहस्य स्थलनिम्नतायां स्थल-
126b कर्मदार्ढ्यशैथिल्यवशात् प्रवणतां सत्यां बिलेषु
मूषिकादिकृतरन्ध्रेषु अभिषेकाम्बुगतौ गोमुख-
द्वारेण निर्गत्य तत्रैवाभिषेक जलस्य गमने च
सति सुधाविहीनेऽपि कल्कादिशैथिल्येपि
सति गुरुराचार्यो महेशं लिङ्गस्थं शिवं कुम्भे
आवाह्य स्थलकर्म स्थलदार्ढ्यं कुर्यात् । तथा चोक्तं
कामिके

स्थलाधोजलनिस्रावे जलेयः पतिते शिवा ।
तदग्रे वा निमग्ने तु भूमौ दोषाः प्रजायते ॥
शान्तिहोमं तदा कुर्यात् सलिले पतिते त्र्यहम् ।
कुम्भस्थं वाथ देवेशं कृत्वा कुर्या स्थलक्रियाम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रोक्षयेच्चाहतोयेन स्नानार्थं प्रतिसन्धिकाम् ।
पुण्याहप्रोक्षणोपेतः कीलियैः कल्पिते स्थले ॥
तत संप्रोक्षणं कुर्यात् स्थलकर्मावसानके ।
तथा सुप्रभेदे
गर्भगेहे स्थले निम्ने काककाद्यैः द्रव्यैः पुनः ।
तदन्ते वास्तुहोमं च पुण्याहं तत्र वाचयेत् ॥
कारणे
सन्ध्याकर्मविहीने च स्थलकर्मविहीनके ।
प्रवर्तते महामारी पुनस्सन्धानमाचरेत् ॥
127a पुण्याहं वाचयेद्दैवं गन्धैर्वाभिषेचयेत् ।
कामिके तु विशेषः कश्चित्प्रतिपादितः । यथा
स्थलकर्मणि विशिष्टे सन्ध्याकर्मविहीनके ।
क्षणमात्रे तु निर्वृत्य कर्मस्थत्र न पूजकः ॥
होमाद्यमपि नेष्टं स्यात् कर्ता लिङ्गं समर्चयेत् ।
गन्धाद्यैरुपचारैश्च शान्तिहोमन्तु वा नयेत् ॥
मूर्तिहोमन्दिशाहोमं तत्कर्म गुरुलाघवात् ।
पीठस्थलेकृतं चेत स्नपनन्देवपीठयोः ॥
तयोरभ्यन्तरस्यापि तात्कालिकत्वात् कारणात् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शुद्धिं वस्त्रादिना कृत्वा यथा निर्माल्यशोधनम् ।
अस्त्राम्बु प्रोक्षणं तत्र स्नपनार्थं द्विजोत्तमाः ॥
बहुदैवासिके स्नानं गङ्गाश्चेत् स्नपनं महत् ।
बहुदैवासिकं बहुदिवससम्बन्धि ।
महाहविस्तदा प्रोक्तं राज्ञो राष्ट्रस्य शान्तये ।
ग्रामस्थानजनानाञ्च तथा तत् ग्रामवासिनाम् ॥
कर्त्तुः कारयितुश्चापि देशिकस्य विशेषतः ।

अथ प्रासादजीर्णोद्धारः प्रदर्श्यते ।

127 b प्रासादः खलु/नागरादिभेदध्या त्रेधा द्विधा स्यात्पुन-
स्फोटादौ सति द्विविशोनञ्च फलं स्यात्तस्य चैकांगतः ।
वैकल्ये सति तच्चदङ्ग मारवेलं तद्व्यतस्साध्यमेत्
सर्वाङ्गे यदि तत्समैस्तदधिकैर्वा कल्पयेत्तत्था ॥

प्रासादो हर्म्यं विमानमिति पर्यायः स तु
नागरादिभिद्भ्या नागर वेसर द्राविडादिभेदेन च
त्रयो भवति । सात्त्विक राजस तामस भेदेन
स्त्रीपुंनपुंसक भेदेनच त्रयो भवति । तदुक्तं
सुप्रभेदे
वेसरं द्राविडं चैव नागरञ्च त्रिधा भवेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कण्ठादारभ्य वृत्तं यत्तद्वेसरमिति स्मृतम् ।

कण्ठादारभ्य चाष्टाश्रं विमानं द्राविडाख्यकम् ॥

सर्वं वै चतुरश्रं यत् प्रासादं नागराभिधम् ।

कारणे विशेष उक्तः

भौमादिस्थूपिपर्यन्तं युगाश्रं नागरं भवेत् ।

वेद्याप्रभृतिचाष्टाश्रं द्राविडञ्चेति कीर्तितम् ॥

कण्ठात्प्रभृति वृत्तं यत् वेसरं परिकल्पयेत् ।

योगजे

स्थूप्यन्तो चतुरश्रयन्नागरं संप्रकीर्तितम् ।

/128a कण्ठात्प्रभृति/वस्वश्रं द्राविडं परिकीर्तितम् ॥

वेद्यात्प्रभृति वृत्तं यद्वेसरं संप्रकीर्तितम् ।

सात्विकं राजसं चैव तामसञ्च त्रिधा भवेत् ॥

सात्विकन्नागरं प्रोक्तं राजसन्द्राविडं भवेत् ।

तामसं वेसरं प्रोक्तं स्त्रीपुन्नपुंसकन्तथा ॥

नागरं पुंविमानं तु द्राविडं स्त्री विमानकम् ।

भवेदिह ।?

नपुंसकं वेसरं स्यात्त्रिधा प्रासाद उच्यते ।

स्थितमासीनशयनं त्रिधा प्रासाद उच्यते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्धमानस्य लिङ्गस्य स्थितं प्रासादमानतः ।

शिवाधिकानां लिङ्गानां प्रासादमासनं विदुः ॥

त्रैराशिकस्य लिङ्गस्य शयनं प्रासादमुच्यते । इति

शिल्पे

पादबन्धं स्थितं प्रोक्तमुपानं बन्धासनं भवेत् ।

पद्मबन्धं तु शयनं ज्ञेयं तत्रापि भेदतः ॥

ब्राह्मणक्षत्रिया वैश्या शूद्राः प्रासाद उच्यते ।

नागरं द्विजमित्युक्तं द्राविडं क्षत्रियस्य तु ॥

वेसरं वैश्यशूद्राणां जातिभेद इति स्मृतम् ।

नागरे द्राविडाख्ये च वेसरे त्वधिदेवता ॥

128b ईशः पितामहश्चैव विष्णुस्तत्राधिदेवता । इति

एवं त्रिविधोऽपि प्रासादः पुनर्द्विधा । लिङ्गवशा-

त्प्रासादः प्रासादवशाल्लिङ्गञ्चेति । तदुक्तं

योगजे

द्विधाप्रासादमित्युक्तं लिङ्गवशात्समुदाहृतम् ।

प्रासादमाने लिङ्गवशा द्विधाप्रासाद उच्यते ॥ इति

कामिके

स्वायम्भुवं बाणलिङ्गं दैविकञ्चार्षकन्तथा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सिद्धविद्याद्यैश्चापि स्थापितं यन्महात्मभिः।
तेषां लिङ्गवशाद्विद्वान् प्रासादं परिकल्पयेत्॥
मानुषे तु पूर्वप्रासादज्ञानं यदि लिङ्गवशात् प्रासाद उक्तः।
कामिके तद्यथा
अथपौरुषलिङ्गस्य प्रासादविधिरुच्यते ।
पूर्वस्मिन्स्थापिते तस्मिन् नष्टे पूर्वमन्दिरे ॥
लिङ्गमानवशेनात्र प्रासादं परिकल्पयेत्। इति
लिङ्गमानमपि पूजांशवशेनैव ग्राह्यं नान्यथा ।
तदुक्तं अंशुमत्काश्यपे
हृदयभागाद्यस्ताद्यत्र मूललिङ्गं नशोधयेत्।
मोहादज्ञानतो वापि रुद्रं खात्वा निरीक्षते॥
कर्तुश्च ग्रामवासीनां राज्ञां स्यान्नाशहेतुकम्।
129a )तस्मान्मूलं नवीक्षेत पूजांशस्य वशात्कुरु॥ इति
तस्य प्रासादस्य स्फोटनादौ स्फुटनादौ आदिशब्देन
पतनाग्निदाहादिकं गृह्यते। दिग्वशेन प्राच्यादि
दिग्भेदेन फलं स्यात्।
तदुक्तं कामिके
प्रासादस्फुटितं पूर्वे यदि राज्ञो भयं भवेत्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आग्नेय्या भागेन दाहस्यात् दक्षिणे कलहो भवेत् ।
नैर्ऋत्याज्जननाशस्यात् वारुण्या भृत्यनाशनम् ॥
वायव्यां शत्रुवृद्धिस्यात् उत्तरे पुत्रनाशनम् ।
ऐशान्यां मूकवान्राजा क्रमेणैवं फलं भवेत् ॥ इति

तस्य प्रासादस्य शकांगतः स्थूपिनासाशालाकपोत
कूटपञ्जरादि मध्ये शकांशेन वैकल्ये सति
भेदपतनादि नाशानौ सत्यां तदङ्गं पतितादिकं
तद्द्रव्यतः दार्विष्टका शैललोहादि मध्ये यद्द्रव्येण
पूर्वं कृतं तद्द्रव्येण साधयेत् कारयेत् । अन्य
द्रव्येण करणे दोषस्योक्तत्वात् । तदुक्तं
कारणे

स्थूपी नासा च शाला च कपोतकूटपञ्जराः ।
एतेष्वेकं यदा हीनं कृत्वा तद्वत्तदा पुनः ॥

सूक्ष्मे

129b अलक्षणान्तो द्रुमस्यात् बहुवर्णस्सशैलकम् ।
एकद्रव्येण निर्माणं धामस्वायंभुवादिषु ॥
तस्यैव जीर्णिते काले तमेव बन्धयेत् दृढम् ।
अन्यद्रव्यकृतं चेत्तु राजराष्ट्रं विनश्यति ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जलसंप्रोक्षणं कृत्वा क्षाळोक्तेनैवमार्गतः ।
तद्द्रव्येणैवकुर्यात्तु पूर्वोक्तविधिनासह ॥
पौरुषेषु विमानेषु शकाङ्ग. हीनके यदि ।
तद्द्रव्येण समं कृत्वा संप्रोक्षणमथाचरेत् ॥ इति
वातुले विशेष उक्तः
अधिष्ठानस्यवर्गे तु जीर्णिते संभवेद्यदि ।
शकादि भूमिपर्यन्त मङ्गलानां फलं क्रमात् ॥
अन्यूनताच तेनैव तस्य वर्गन्न दोषभाक् ।
तदूर्ध्वं हि न कर्त्तव्यं पुनस्सन्धानमाचरेत् ॥
पादवर्गे त्रियङ्गुलये जीर्णिते स्फुटिते तु वा ।
तद्वर्गसहितं कृत्वा तदूर्ध्वं न च कारयेत् ॥
प्रस्तरस्य गळे वर्गं त्रियङ्गुल विहीनके ।
तद्वर्गसहितं कृत्वा तदूर्ध्वं न च कारयेत् ॥
पुनस्सन्धानकं कुर्यात् शिखरे तु त्रियङ्गुलम् ।
130a |स्फुटिते खण्डिते भिन्ने दोषयुक्तन्न दोषभाक् ॥
स्थूपिवर्गस्य चाङ्गुलयं द्व्यङ्गुलं वा विहीनके ।
दोषहीनन्तु कर्त्तव्य मूर्द्धे सन्धानमाचरेत् ॥
हीनाधिक्यन्तु वर्गेचे द्राजराष्ट्रं विनश्यति ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तद्दोषशमनार्थाय स्नपनं शान्तिहोमयुक् ।
स्थूपिप्रध्वानशूलस्य चलिते वक्रभिन्नके ॥
पिपीलिकोटरे चैव पुरावर्तार्थ हीनके ।
राजराष्ट्रं तु शोकं च स सङ्कुल्यक्रान्तु सम्भवेत् ॥
नवमन्यत्परिग्राह्यं लक्षणोक्त क्रमेण तु ।
पद्मकण्ठस्य कण्ठे तु पालिकाचक्रकुड्मलम् ॥
क्रमात्षड्दुर्ग सहितं तद्द्रव्येण समाचरेत् ।
सम्प्रोक्षणं ततः कुर्याच्छान्तिहोमेन शाम्यति ॥
षड्दुर्गे स्फुटिते भिन्ने नाशिते चैव हीनके ।
तद्ग्रामवासिनस्सर्वे रोगशोकभयावहम् ॥
पुनस्सन्धानकं कृत्वा स्नपनं शान्तिहोमकम् ।
शिखराकृति भूषाञ्च नासिका भूषणादिकम् ॥
वालदण्डस्य विच्छेदे पुरातनमथापि वा ।
ग्रामश्रीं त्वन्यथा कृत्वा ग्रामश्रीस्त्वन्यथा भवेत् ॥
पुनस्सन्धानकं कृत्वा शान्तिकुम्भाभिषेचनम् ।
130b कण्ठे च प्रस्तारे हीने पादपीठविहीनके ॥
भूषणे पद्मविच्छेदे शालाकोष्ठकमालिके ।
कम्पे च वाजिने हीने सस्यनाशं न संशयः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुनस्सन्धानकं कृत्वा शान्तिहोमन्तु कारयेत् ।
दिङ्गति शिखरे देवान् जीर्णोद्धार क्रमात्कुरु ॥ इति
विमानाद्यङ्ग वैकल्येपि क्वचित् क्वचित् शान्तव्यं
प्रतिपादितं । तद्यथा कामिके-

सर्वलक्षणसंयुक्त मल्पदोषं यदा भवेत् ।
प्रासादस्यतु विस्तारे रविमात्रन्नदुष्यते ॥
उत्सेधो रविमात्रान्तं शान्तव्यञ्चाङ्गुलान्तकम् ।
द्विमात्रन्तु स्थलं प्रोक्तं स्तम्भाद्यङ्गेषु मातृकम् ॥
ग्रामखेट पुराणान्तु दण्डान्तं परिकीर्तितम् ।
सालेच हस्तमानान्तं शान्तव्यमिति कीर्तितम् ॥

कारणे

स्थूप्याद्यावयवच्छेदे राकाङ्गुलन्तु सङ्ग्रहेत् ।
तदूर्ध्वं न प्रकर्तव्यं द्व्यङ्गुलं पद्महीनके ॥
तदूर्ध्वं नेष्टमेवं स्यात् महानासीत्रियङ्गुलम् ।
पश्चाद्धीनन्तु कर्तव्यं शिखरे तु दशाङ्गुलम् ॥
13 a |पश्चान्नेष्टन्तु कर्तव्यं कण्ठे तु त्र्यङ्गुलं भवेत् ।
अतऊर्ध्वं न कर्तव्यं वाजनादि द्व्यङ्गुलम् ॥
शक्तिध्वजमिति प्रोक्त मेवमेवञ्च सङ्ग्रहेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ह्रोमादिप्रस्तरान्तञ्च सप्राङ्गं समावधि ।
सर्वं गृहीत्वा कर्तव्य मूर्द्धन्याद्यं प्रयत्नतः ॥
अन्येषामपि सर्वेषां जीर्णोद्धारं समाचरेत् । इति
सावमेकाङ्ग वैकल्योद्धार प्रकारमुक्त्वा सर्वाङ्ग
वैकल्ये उद्धारप्रकार माह । सर्वाङ्गेत्यादि ति
सर्वाङ्गेऽपि वैकल्ये सति तत्समैः पूर्व प्रासाद
द्रव्यसमैः स्तदधिकैर्वा द्रव्यैः तथा पूर्वप्रकारेणैव
तत्कल्पयेत् । तदुक्तं सूक्ष्मतन्त्रे -
सर्वाङ्गानोशये दृष्ट्वा प्रासादस्य विशेषतः ।
तद्द्रव्येणैव तत्कुर्यात् पूर्वोक्त विधिनासह ॥
परद्रव्येण कर्तव्ये यथा वित्तानुसारतः ।
सत्क्षणास्यचामूस्तु परद्रव्येण तद्क्रिया ॥
तस्मात्सर्व प्रयत्नेन हीनञ्चैव न कारयेत् ।
कारणे
प्रतिमायां विमानस्य वृषणोद्धारणं विना ।
स्तूप्याद्याद्येकान्तान्तरमात्वात्यक्त्वा ह्रशोषकम् ॥ ?
131b आद्येष्टिकां शिपेत् प्राग्वत् गर्भन्यास समन्वितम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यावन्मन्दिरपर्यन्तं तावत् कृत्वासलक्षणम् ।

यद्द्रव्येण कृतं हर्म्यं यत्प्रमाणं यदाकृति ॥

तद्द्रव्येणपुनः कृत्वा तत्प्रमाणेन बुद्धिमान् ।

सर्वावयवसंपूर्णं यथाशोभं यथाबलम् ॥

द्राविष्टाङ्गिलाद्यैव जीर्णप्रासके ऽपि च ।
(सादृ क्रोड)

कर्मयोग्यास्तु सङ्ग्राह्य कोशास्संपरिवर्जयेत् ॥

हीनमानो द्भुतेधाम्नि शास्त्रोक्तेनाधिकं कुरु ।

तस्माद्धीनन्न कर्त्तव्यं उत्कृष्टं शुभदं स्मृतमिति ॥

कामिके

नागरे नागरं कुर्यात् वेसरे वेसरं मतम् ।

द्राविडे च तथा कुर्यात् वराप्रासादोध्वने ऽपि च ॥

अंशुमति

वेसरे वेसरं कुर्यात् द्राविडे द्राविडं मतम् ।

शान्तिकादिषु यत्कार्यं तदेवतु पुनः पुनः ॥

विपरीतमनर्थाय भवेत्तत्र न संशयः ।

ध्वने ध्वने विमाने तु तद्वा भवनमिष्यते इति

महाविश्वकर्मीये

मानं मानादिसंयुक्तं विमानं मण्डपन्तु वा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तन्मानाद्धिके हीनं न कुर्यात्सर्वदोषकृत् ।
मूलहर्म्यं शिलाभिश्चेत्तत्पुरो मण्डपादिकम् ॥
52 a शिलाभिर्विष्टाभिर्वा मूलञ्चेदिष्टकामयम् ।
मण्डपादीनि सर्वाणि न कुर्यादुपलैर्वरैः ॥
अज्ञानान्मोहतो वापि कुर्याद्यदि नराधमः ।
सर्वदोषप्रदं नित्यं तस्मात् परिहरेत्सुधीः ॥

अंशुमति

विमानजीर्णे तच्चैव उपानाद्यञ्च जीर्णितम् ।
पुराणानानि विमानानि न्यूनाधिक्यान्न कारयेत् ॥
पूर्वमाने न कर्त्तव्यं मन्यमाने न कारयेत् ।
यजमानेच्छया कुर्यात् कालापेक्षां न कारयेत् ॥

मोहशूरोत्तरे

वाशिन्याभिष्टकां कुर्यात् रौष्टकञ्चोफलं हरेत् ।
हीनाधमोत्तमैर्द्रव्यैः कुर्यात्तच्च न मयं शुभम् ॥ इति ।

निर्वासे

शैलजे शैलजञ्चैव दारुजे दारुजन्तथा ।
मृण्मये मृण्मयञ्चैव विपरीतन्न कारयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अजिते

मृत्तिका दारुजं श्रेष्ठं दारुजाद्दैष्टकन्तथा ।
राष्ट्रकाच्छैलजन्तद्वत् क्रमाच्चतगुणोत्तरम् ॥
जीर्णोद्धारे चतुर्णान्तु श्रेष्ठं स्यादुत्तरोत्तरम् । इति

कामिके

कृतयुगे नागरे स्यात् त्रेतायां द्राविडमिष्यते ।
द्वापरे वेसरं कार्यं सार्वदेश्यं कलौ युगे ॥
वराटञ्चैव कालिङ्गं सर्वत्रापि च संमतम् ।
तत्रैव प्रकारेण । ~~तस्माच्छ्रेयोर्थिभिः कार्यं~~
तस्माच्छ्रेयोर्थिभिः कार्यं सार्वदेशिकसंज्ञितम् ॥
तन्त्रसङ्करदोषो वा मन्त्रसङ्करजोऽथवा ।
आचार्यसङ्करो वापि देशसङ्कर एव च ॥
कालसङ्करदोषञ्च युगसङ्कर एव च ।
अन्योपि सङ्करो वापि यत्नात्तो विवर्ज्यत इति

अथैवं प्रासाद जीर्णोद्धारे शिल्पिकृत्य मुक्त्वाऽऽचार्यकृत्यमाह –

आचार्यश्शिवध्याम्नि जीर्णपतिते लिङ्गादि बालाभिधं
कृत्वा धाम च मूलशिल्पिमपि चात्राबाह्य मूलं ततः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कृत्वा पञ्चारमद्ध्यगं प्रतिदिनं संपूजनं शान्तियुत्
निष्पन्ने भवने पुनर्यथाविधिवन्मूले स्वकार्यं न्यसेत् ॥

आचार्यः कर्षणादि प्रतिष्ठान्त क्रियाकलाप
133a निपुणः तस्यैवात्राधिकारात् । शिवधाम्नि शिव
प्रासादे जीर्णपतिते जीर्णे वाग्निदाहाद्यशनि
पतनादि प्रवाहादिना वा पतिते सति बाला-
भिन्नं लिङ्गञ्च धाम आलयञ्च बालालिङ्गं
बालालयञ्च कृत्वा तदुक्तं –

कामिके –

हर्म्यारम्भे च जीर्णे च भिन्ने तु विकलाङ्गके ।
स्फोटनादिषु दोषेषु बालस्थानन्न कारयेत् ॥

वातुले

मन्दिरे चलिते भिन्ने पतिते नाशितेऽथवा ।
बालहर्म्यन्ततः कृत्वा स्थापये द्विधिपूर्वकम् ॥
पूर्ववद्भवनं कृत्वा संप्रोक्षणमथाचरेत् ।
लिङ्गे आधारपादे च नन्द्यावर्तस्थलेऽपि च ॥
शुद्धद्वारस्य द्वारे तु चलने सति कारयेत् ।
तद्राष्ट्रनाशनं प्रोक्तं नृपतिस्त्वन्यथा भवेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बालहर्म्यन्ततः कृत्वा पुनस्सन्ध्यानमाचरेत् ।

सूक्ष्मे

बालस्थानं विनायत्र पुत्रपौत्रविनाशनम् ।
तस्मात्सर्वप्रयत्नेन बालस्थानं विधीयते ॥

तत्रैव बालस्थानप्रकरणे

विनाबालगृहं यत्र कुलक्षयकरं भवेत् ।
तस्मात्सर्वप्रयत्नेन बालगेहं प्रकल्पयेत् ॥

विश्वकर्मीये

133 b उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
सुमुहूर्ते सुनक्षत्रे देवबालयवेशनम् ॥
दोषं दृष्ट्वा तदा काले तरुणालयकं शुभम् ।
तत्र सामान्येन कालनिर्णयमोक्तः ।
भूनिमित्तं परीक्षा च शङ्कुस्थापनमेव च ॥
कर्षणं पदविन्यासं कालादीनां परीक्षणम् ॥
मूर्द्धेष्टका शिलान्यासं शूल कर्म च ।
यागशालादि कुण्डादि वेदारम्भादि कर्म च ॥
जलसंप्रोक्षणादीनि जीर्णोद्धारादिकर्म च ।
देवतावभृतस्नानं पवित्रारोहणादिकम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवालयस्थ बिम्बानां आवाहन विसर्जनम् ।
यतानि कारये दह्नि रात्रौ तानि न कारयेत् ॥ इति
कारणे

अथ बालप्रतिष्ठान्तु प्रवक्ष्यामि विशेषतः ।
द्विधा बालालये प्रोक्तं प्रथमञ्च द्वितीयकम् ॥
ग्रामे वा नगरे वापि पत्तने राजधानिके ।
एतेष्वन्येषु देशेषु मूलस्थानस्य यत्पुरा ॥
वास्तुनिर्दिशानान्तेच कल्पितं प्रथमं भवेत् ।
सुप्रभेदे

पुनः प्रासादकरणे छिन्ने भिन्ने नवीकृते ।
विशिष्टेच तथा पीठे लिङ्गके प्रतिमे तथा ॥
यत्कृतं तद्द्वितीयाख्यं तरुणालयमुत्तमम् ।
134a कारणे । मासपक्षर्क्ष तिथ्यादिकं न प्रेक्षणीयमिती
त्युक्तम् । तद्यथा [illegible]

मासपक्षर्क्ष वारादि नाद्य बालगृहस्य तु ।
लिङ्गस्थापन कर्मोक्त मार्गेणैव समाचरेत् ॥
तेषु किंचिद्विशेषोस्ति श्रेष्ठा वै चतुरङ्गुलाः ।
मध्यमा त्र्यङ्गुला ज्ञेया अधमा द्व्यङ्गुलाः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ढ्रिलिप्याग्र्यं प्रकर्त्तव्यं मानपक्षादिकं विना । इति

[illegible] बाललिङ्गलक्षणम् यथा सुप्रभेदे

लोहजं शैलजं लिङ्गं दारुजं मृम्मयन्तथा ।

कारयेत् तद्विशेषेण लक्षणोक्तेन देशिकः ॥

शैले वृक्षमयं वापि बाललिङ्गं प्रकल्पयेत् ।

बालालयन्तथा लिङ्गमेवं सङ्कल्प्य देशिकः ॥

कामिके

लिङ्गमानवशेनापि पीठं तु परिकल्पयेत् ।

लोहशैलकुजे बाललिङ्गमेवं विधीयते ॥

क्षीरवृक्षैः पलाशैर्वा वटोदुम्बरपिप्पलैः ।

मधूकपनसैः प्लक्षैः रसालचन्दनखादिरैः ॥

सरकाम्रगवृक्षाभ्यां लिङ्गं बेरं समाचरेत् ।

सुप्रभेदे

शमीबिल्वमधूकैश्च अश्वत्थोदुम्बरैस्तथा ।

134 b बाललिङ्गं प्रकर्त्तव्यं मृम्मयञ्चेत् सुपक्वकम् ॥

सयोनिं कारयेत्पीठं अथवा चेष्टकामयम् ।

अत्र बाललिङ्गस्य मानभेदः वीरतन्त्रे प्रतिपादितम् ।

तद्यथा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्वारमानेन वा कुर्यात् गर्भमानमथापि वा।
लिङ्गमानेन वा कुर्यात् तालमानेन वा पुनः॥
तल्लिङ्गलक्षणं सुप्रभेदे -
पूजाभागसमायामं त्रिभागं वार्धमेव वा।
आमस्य द्रुमान्नाहं लक्षणोद्धारणं विना॥
नवौ विष्णुविरिञ्चांशौ तच्छिरो मूललिङ्गवत्।
बालगेहान्तरे पीठं बाललिङ्गसमोन्नतम्॥
उच्छ्राये समविस्तारं सावटं संप्रनालकम्।
लिङ्गायामं त्रिधा कृत्वा भागं पीठे निवेशयेत्॥
वृत्तं वा चतुरश्रं वा षोडशाश्रेण योजितम्।
रत्नन्यासं न कर्तव्यं पादकीलादिकानि च॥
प्रतिलिङ्गं न कर्तव्यं यथाविधि समाचरेत्।
पीठे त्वावाहनपक्षे तल्लक्षणं कारणे उक्तम्।

तद्यथा

मूलस्थानागते कुर्यात् च्छत्राकारे विशेषतः।
135 कुर्याच्छाकजाथ वृत्तं वा त्रिधा पीठाकृतिर्मतम्॥
लिङ्गनाहन्तु विस्तारं उत्सेधं स्यात्तदर्धकम्।
इष्टकाभिस्सुपक्वाभिः पीठं कुर्यात्तु तद्द्वयोः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रत्नन्यासं प्रकर्तव्यं पादशौलादि कर्म च ।
ब्रह्मसूत्रं विना कुर्यात् सर्वं स्यात्प्रथमस्य तु ॥
रुद्रभागसमायामं नाहन्तेनैव कल्पयेत् ।
तन्नाहं पीठविस्तारं तस्यार्धं पिण्डिकोच्छ्रयम् ॥
शेषं पूर्वोक्तवत्प्रोक्तं द्वितीयस्यैवमाचरेत् ।
बालालयलक्षणं यथा कामिके -
मूलस्थानस्य चैशान्यामुत्तरे पूर्वयाम्ययोः ।
आग्नेय्यामिष्टदेशे वा कुर्याद्बालगृहं गुरुः ॥
अजिते
भूतवेदाग्निहस्तैस्तु श्रेष्ठमध्यकनिष्ठकैः ।
विस्तृतं कल्पयेद्द्रव्यं शैलं पक्वेष्टकामयम् ॥
आश्लेष्टकामयं वापि मुखमण्डपसंयुतम् ।
कोशेकांशे युगांशैस्तु गर्भन्तस्य प्रकल्पयेत् ॥
तत्रान्तरे ग्निभागे तु व्योमांशं स्यान्मसूरकम् ।
135b मसूरद्विगुणांभित्तिमुच्छ्रायेण प्रकल्पयेत् ॥
तदूर्ध्वं दारुभिः कूटं कल्पयेत्कल्पवित्तमः ।
लिङ्गमेवं समुत्पाद्य मूलगर्भार्धमानतः ॥
त्रियंशां वा चतुर्थांशां प्रोक्तं बालगृहलिङ्गम् इति ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अत्र बालालिङ्गे मूलशक्तिं मूललिङ्गाद्याहृत शक्ति-
मावाह्य यात्राहोमसहितं सापेक्षत्वेन सहितं
संक्रमय्य तत्सन्निधाप्रकारश्च बहूनेक तत्तदागम
वचनैरेव तत् त्रिधा कल्पक्रमः प्रदश्यते ।

आजिते

बालालयस्य पुरतो दक्षिणे तरयोस्तु वा ।
वह्निशाङ्करयोर्वाऽपि देशे कुर्यात्तु मण्डपम् ॥
सप्तपञ्चत्रिभिर्हस्तैः श्रेष्ठमध्य कनिष्ठकम् ।
तन्मध्ये वेदिकां कुर्यात् नवभागैकभागतः ॥
कुण्डानि परितः कुर्यात् पूर्ववन्मान्त्रवित्तमः ।
युगाश्रं ?
अथवा पञ्चहोमस्तु प्रागादिषु यथाक्रमम् ।
चतुरश्रं धनुर्वृत्तं त्रिकोणञ्च सुवृत्तकम् ॥

कामिके

ईशानशक्रयोर्मध्ये प्रधानं वृत्तकुण्डकम् ।

आजिते

गोमयेनोपलिप्याथ ब्राह्मणान्भोजयेत्सुधीः ।
136a ततो लिङ्गं समानीय मण्डपस्योत्तरे कृते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्नानमण्डप मध्ये तु वेदिका तुल्य विस्तृते ।
स्नानवेद्यान्तु विन्यस्य पञ्चब्रह्म समुच्चरन् ॥
पञ्चामृत पञ्चगव्यैस्तु शुद्धिं कृत्वा समाहितः ।

कामिके

मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत् ।
पश्चात् चिक्कलिपेन मुद्रास्य पुण्याहं वाचयेत्ततः ॥
जलमध्ये प्रपां कुर्यात् सर्वलक्षणसंयुताम् ।
प्रक्षाल्य पञ्चगव्येन लिङ्गमस्त्रेण देशिकः ॥
शुद्धतोयेन संस्नाप्य गन्धादिभिः समर्चयेत् ।
वस्त्रयुग्मेन संवेष्ट्य लम्बकूर्च समायुतम् ॥
जले तु शाययेल्लिङ्गं सद्येनैव कुशोपरि ।
त्रिरात्रं चैकरात्रं वा वेदव्यामा वसानकम् ॥
प्रभूत पञ्चगव्येन स्नपनं वा समाचरेत् ।
परितः कलशानष्टौ लोकपालाधिदैवतान् ॥
सवस्त्रान्सहिरण्यांश्च सकूर्चान्सापिधानकान् ।
वास्तुहोमं ततः कुर्यात् प्रासादे मण्डपेपि च ॥
पर्यग्निकरणं कृत्वा वास्तुहोममथ वह्निना ।
जलादानीय लिङ्गं तु स्नानश्वभ्रोपरि न्यसेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

136 b वस्त्रं विसृज्य लिङ्गं तु पूर्ववच्छुद्धिमाचरेत् ।
कौतुकं बन्धयेद्धीमान् हृदयेन तु मन्त्रतः ॥
वस्त्रेण वेष्टयेल्लिङ्गं वामदेवेन देशिकः ।
शालिभिर्वेदिकोर्ध्वे तु च अष्टद्रोणादिनिर्मिते ॥
तण्डुलैश्च तिलैर्दर्भैः पुष्पैश्चापि परिस्तरेत् ।
शयनं कल्पयेन्मध्ये चर्मकाद्यैरनुक्रमात् ॥
सर्वातोद्यसमायुक्तं स्तोत्रमङ्गलवाचकैः ।
सर्वलक्षणसंयुक्तं मार्दिक्षौवस्साक्षिकैः ॥
दिव्यगन्धानुलिप्ताङ्गो पुष्पमाला विभूषितः ।
शुक्लवस्त्रोत्तरीयकः ॥ [line as written: शुक्लवस्त्रो धृतोष्णीष शुक्लवस्त्रोत्तरीयकः ॥]
पञ्चाङ्गभूषणोपेत सकलीकृत विग्रहः ।
इन्द्राद्यैर्लोकपालैर्युक्त माचार्यश्चोत्तरानन: ॥
शयने शाययेल्लिङ्गं प्राक्शिरस्कमधोमुखम् ।
अभ्यर्च्य हृदयेनैव गन्धाद्यैरुपचारकैः ॥

अजिते

अधिवासनकाले तु विशेषोयं प्रदर्श्यते ।
जीर्णलिङ्गान्तिकाग्रे वा स्थण्डिले चोत्तरेऽर्पिते ॥
विन्यसेत्कलशौ मन्त्री शिवशान्ति समन्वितौ ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यात्राहोमन्तु तत्रैव कृत्वा तु विधिनाततः ।
137a भोजयेदथ विप्रेन्द्रान् धर्मव्रतपरायणान् ॥

यात्राहोमप्रकारो यथा -

यात्राहोमविधिं वक्ष्ये सैकतस्थण्डिले शुभे ।
विधिनाग्निं समाधाय समिदाज्यचरून् क्रमात् ॥
यवसर्षपलाजांश्च चरुणा तत्सङ्ख्यया ।
प्रत्येकन्तु तदर्धं वा तत्तन्मूलाङ्गकैः क्रमात् ॥
होमयेत्तदनन्ते तु बीजमुख्येन सर्पिषा ।
होमयेद्दिक्कोधोमान् सङ्ख्यायापि पुरोक्तया ॥
पूर्णां सर्वात्मना तत्र जुहुयाद्दिक्कोत्तमः ।

सुप्रभेदे

उत्थाप्य क्राथनाल्लिङ्गं तरुणालयमध्यमे ।
संस्थाप्य लिङ्गं सुस्निग्धं पीठं स्याबन्धमध्यमे ॥
स्थापयेत्पीठमध्ये तु शिवबीजमुदीरयन् ।
बन्धयित्वा त्रिबन्धेन हृदयं मन्त्रमुच्चरन् ॥

अजिते

बालस्थानस्थिते लिङ्गे देवमावाह्य मन्त्रवित् ।
तद्विधानं श्रीमत्कामिके

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलगेहाग्रके तत्र पूर्ववत्स्थण्डिले कृते ।
कुम्भान्संस्थाप्य पूर्वोक्तविधिनादेशिकाधिपः ॥
मूललिङ्गन्तु संपूज्य गन्धाद्यैर्हविषा सह ।
137b प्रणम्य देवदेवेशं कर्ता कर्मविचक्षणः ॥
एकवत्सरमारभ्य यावत्स्याद्द्वादशाब्दकम् ।
तदन्तरे नवीकृत्य पुनस्संस्थापयाम्यहम् ॥ ~~[illegible]~~
इति विज्ञाप्य तत्कर्ता देशिकेन सहैव तु ।
लिङ्गाद्देवं समावाह्य कुम्भमध्ये न्यसेत् गुरुः ॥
पीठाद्देवीं समावाह्य वर्द्धन्यामध्यमे न्यसेत् ।

सुप्रभेदे ~~विज्ञाप्यदेवदेवेशं~~

विज्ञाप्य देवदेवेशं क्षणकालं विचक्षणः ।
एकाब्दाद्द्वादशाब्दान्तं बालस्थाने स्थितो भव ॥
एतयोरुभयोर्मध्ये कुर्यान्मूलप्रवेशनम् ।
विज्ञापयेद्द्वितीयेतु आद्ये विज्ञापने विना ॥

वातुले

प्राग्द्वयेत्तु नमस्कृत्य त्रिपक्षे वा त्रिमासिके ।
अब्दे त्रितीये कर्तव्यं विज्ञापयेत्तु सान्निध्यौ ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रभेदे

कुम्भस्थं देवदेवेशं तन्त्रमूलेन विन्यसेत् ।

शिवाङ्गानि न्यसेत् पश्चात् पिण्डिकायां मनोन्मनीम् ॥

अष्टविद्येश्वरांस्तत्र पीठे पूर्वावृतौ न्यसेत् ।

विद्येशानां शिवाद्यैस्तु कुम्भैस्तत्राभिषेचयेत् ॥

एतच्चावाहनं सङ्क्रमणरूपतः । न तु निरालम्बं सालम्बं वा

138 a एतेषां स्वरूपमात्मार्थपूजापद्धतौ विस्तरेण प्रदर्शितम्

तत्रावधार्यतां कामिके

तदग्रे स्थण्डिलं कृत्वा प्रागवदग्निमुखं नयेत् ।

समिदाज्यान्नलाजैश्च तिलैरष्टोत्तरं शतम् ॥

मूलेन होमयेद्विद्वान् अङ्गानाञ्च दशांशतः ।

त्रिमात्रप्लुत दूर्वाभिर्मृत्युजिन्मन्त्रमुच्चरन् ॥

सहस्रं वा तदर्धं वा शतमष्टोत्तरं तु वा ।

एवं हुत्वा तदन्ते तु शान्तहोमं समाचरेत् ॥

वासरैस्सूर्यपूर्वैश्च नक्षत्रैस्तु रिणादिभिः ।

मेषादिमासकैश्चैव तिथिभिः प्रथमादिभिः ॥

जुहुयादेकयाहुत्या प्रतिवत्सरमाचरेत् ।

अगाद्युद्धयनं कुर्युः संस्कृतं वेदपारगाः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्र मन्त्राः ऋग्याद्यास्तु जप्तव्या मूर्त्तिहेतवः।
सद्योजातस्तु ऋग्वेदो वामदेवो यजुस्स्मृतः॥
अघोरस्सामवेदस्तु अथर्वपुरुषस्स्मृतः।
अष्टोत्तरसहस्रं वा तदर्द्धं वा तदर्द्धकम्॥
अष्टोत्तरशतं वापि जपेद्वै देशिकस्सिद्धये।
मूर्त्तिपानां मन्त्रैस्तु देशिकस्सर्वमाचरेत्॥

अजिते

पञ्चहोमविधाने तु पुरुषं पूर्वकुण्डके।
138b दक्षिणे बहुरूपन्तु पश्चिमे सद्यमेव च॥
उत्तरे वामदेवाख्यं मीशाने तु प्रधानकम्।
नवकुण्डहोमपक्षे। सुप्रभेदे
खादिरं वटबिल्वौ च प्लक्षाश्वत्थ मुदुम्बरम्।
शमीवैकङ्कतश्चैव समित्पूर्वादितः क्रमात्॥
पलाशन्तु प्रधानस्य शतमष्टोत्तरं भवेत्।
मूलमन्त्रेण होतव्यं पलाशैर्देशिकोत्तमः॥
मूलाद्दशांशतोऽन्येषां दिक्षु ब्रह्माणि कल्पयेत्।
विदिक्षु हृदयादीनि मूलार्धं वा समन्तु वा॥
पूर्णाहुतिं ततः कुर्यात् वौषडन्तेन मूलतः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आत्मतत्वादिकन्यस्य मूर्त्तिमूर्त्तिधराविच ।
सर्वं लिङ्गे तु विन्यस्य वह्निमावाह्य होमयेत् ॥
पूर्णाहुतिं ततो दद्यात् नयेत् द्वात्रिं च मङ्गलैः ।
अपरे दिवसे धीमान् सुस्नातो मूर्त्तिपैस्सह ॥
सकलीकृतदेहस्तु द्वारद्वाराधिपान्यजेत् ।
देवं संपूज्य पुष्पाद्यैः कुण्डमस्त्रेण सेचयेत् ॥
संस्कृत्य सृक्स्रुवाज्यानि ब्रह्मादीन्परितो यजेत् ।
पूर्णाहुतिं ततो दत्वा मन्त्रानावास तर्प्ययेत् ॥
प्रायश्चित्तार्थमन्ते तु होमं सम्यक् समाचरेत् ।
139a | अघोरेण शतं हुत्वा जयाद्यैः पूरितक्षये ॥
पूर्णाहुतिन्ततो दद्याद्देशिको मूर्त्तिपैस्सह ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
अधमा पञ्चनिष्कस्यात् द्विगुणा मध्यमा भवेत् ।
त्रिगुणा चोत्तमा प्रोक्ता त्वधमत्रय कल्पयेत् ॥
द्विगुणा मध्यमे कल्पे त्रिगुणा चोत्तमा भवेत् ।
दशभागैकभागात्तु मूर्त्तिधारक दक्षिणा ॥
तदर्धं मन्त्रजप्तृणां वैदिकानान्तु तत्समम् ।
दैवज्ञे तत्समं विद्या द्विगुणं वास्तुहोमिनः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आचार्यस्य चतुर्थांशा द्विलिपेन दक्षिणामता ।

अजिते

अनुनोक्तं समभ्यर्च्य प्रभूतञ्च हविर्द्ददेत् ।
नित्योत्सवादिकं सर्वं बालस्थानेपिकारयेत् ॥
उत्सवन्तु यथाशास्त्रं द्वितीयस्य तरुणालये । इति
लिङ्गादि बालाभिषेधमित्यत्र आदिशब्देनाकुम्भ-
तलोक्त दशविध बाललिङ्गान्यप्युच्यन्ते ।

तद्यथा

बालस्थानविधिं वक्ष्ये श्रूयतां रविसत्तम ।
आद्यद्वितीयमेवन्तु द्विविधन्तरुणालयम् ॥
आद्यं बालगृहं कल्प्य मूलगेहमतः परम् ।
139 b मूलबिम्बं प्रतिष्ठाप्य पश्चाद्बालगृहं त्यजेत् ॥
रविमाद्यक्रमं प्रोक्तं द्वितीयञ्चाधुना शृणु ।
प्रायश्चित्तार्थकं यत्र स्थापयेद्बालबिम्बकम् ॥
द्वितीयमिति विज्ञेयं तद्भेदं दशधा विदुः ।
खड्गे च कूर्चे बिम्बे च दर्पणप्रतिबिम्बके ॥
कुम्भे च स्थण्डिले चैव मण्डलेपादुकेऽथवा ।
पटेवा भित्तिचित्रेवा बालबिम्बार्थकं यजेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मासादूर्ध्वं न कर्त्तव्यं कुम्भसंस्थापने विदुः ।
कलशस्थापनस्योक्त मार्गेणैव समाचरेत् ॥
मण्डले स्थण्डिले चैव कूर्चे चैवाविकोषतः ।
तद्बिम्बस्यार्चनं कुर्यात् आसप्तदिवसावधि ॥
मण्डलार्चनमार्गेण कारयेद्द्विजोत्तमः ।
कोशान्यन्यानि बिम्बानि द्वादशाब्दावधिं यजेत् ॥
एतेषां धनप्रमाणादि वक्ष्येन विषयभेदो द्रष्टव्यः ।

कामिके

स्वयम्भूतलिङ्गे च दैविके चार्षकेऽपि वा ।
गाणपे लोहजे चैव नद्यां प्रस्रवणादिषु ॥
एवमादिषु लिङ्गेषु नैव कार्यं व्यवस्थितिः ।
140a स्वयम्भुलिङ्गस्य बाललिङ्गनिषेधः कुत्राविदकः ।
बाललिङ्गकर्त्तव्यमिति च कुत्रचित् । तत्र जीर्णालय
विषये क्षन्तव्याङ्गो च निषेध इति मन्तव्यम् ।

वीरतन्त्रे

स्वयम्भूतलिङ्गस्य स्थापितस्य महर्षिभिः ।
दैवैर्वा स्थापितस्यापि बाललिङ्गन्नकारयेत् ॥
जीर्णलिङ्गे तु कर्त्तव्य मन्यथा तु न कारयेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कामिके

मानुषाणान्तु लिङ्गानां मन्त्रकार्यो घटस्थितिः ।
सप्ताहान्तञ्च पक्षान्तं मासान्तञ्चेत् घटस्थिति ॥
तदूर्ध्वं कुम्भसंस्थं चेद्देवेशस्सर्वदोषकृत् ।
तस्मात्सर्वप्रयत्नेन मासान्ते वाऽथ पूर्वके ॥
संस्थाप्य बाललिङ्गाख्यं तन्मन्त्रं विन्यसेन्मनुम् ।

कारणे तु

लिङ्गस्थं देवमावाह्य घटस्थञ्चैव बुद्धिमान् ।
पञ्चाहमुत्तमं प्रोक्तं सप्ताहं मध्यमं भवेत् ॥
मासैकन्त्वधमं प्रोक्तं घटस्थस्य तु बुद्धिमान् ।
नित्यं नवजले योज्य पूजयेत्पूर्ववत्क्रमात् ॥
सान्निध्याय देवेशं सामुख्यञ्च सवाहनम् ।
आवृताश्चान्यपरिवारास्तथा तत्रैव योजयेत् ॥
विमानस्थांस्ततो देवान् तथा तत्रैव योजयेत् ।

140b कामिके

मासादि द्वादशाब्दान्तमन्तरं दिनेवथ ।
तस्मादादाय देवेशं मूललिङ्गे निवेशयेत् ॥ इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अनन्तरं मूललिङ्ग कृत्यमाह मूलान्तत इति ।

ततोनन्तरं मूलं मूललिङ्गं पञ्जरमध्यगं दारुकृत

पञ्जरान्तस्थं कृत्वा प्रतिदिनं शान्तियुक्त

शान्तिहोमसहितं संपूजनं कृत्वा, तथाचोक्तं—

कारणे

बाललिङ्गन्ततः कुर्यात् स्थापयेत्तरुणालये ।

मूललिङ्गं विशेषेण पञ्जरेणातु योजयेत् ॥

तत्रपूजाप्रकर्त्तव्या प्रोक्षणान्ते विशेषतः ।

नित्यादीनिविशेषान्तं तल्लिङ्गे तु सुयोजयेत् ॥

कामिके

प्रत्यहं नार्चनं कार्यं शान्तिहोमसमन्वितम् ।

कारणे

यावन्नवीकृतं लिङ्गं प्रासादाद्यं यथाविधि ।

तावत्पूजादिकं सर्वं कारयेत्तरुणालये ॥

सातत्पञ्जरमध्य प्रवेशनञ्च आवर्त्तनावर्त्त-

पुनरावर्त्तनान्तरितारव्य चतुर्विधसंप्रोक्षण

मध्ये पुनरावर्त्तनान्तरितकमिति वदन्ति ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तथा चोक्तं मकुटागमे

संप्रोक्षणविधिं वक्ष्ये श्रूयतां रविसत्तम ।

141a आवर्त्तं प्रथमञ्चैव मनावर्त्तं द्वितीयकम् ।

तृतीयं पुनरावर्त्तं चतुर्थं चान्तरीतकम् ॥

कर्षणादिप्रतिष्ठान्तमावर्त्तञ्चेति कीर्त्तितम् ।

प्रायश्चित्तादिकञ्चैव मनावर्त्तन्तथोच्यते ॥

प्र... गोपाङ्गहीने च बेरायेत्रादिहीनके ।

स्थलकर्म विहीने च पिण्डिकाब्ज विहीनके ॥

भूषणायुध हीने च प्रोक्षणं चान्तरीतकम् ।

कारणे -

प्रासादे पतिते भिन्ने लिङ्गे च चलिते तथा ।

मूलालयात्समादाय स्थाप्य बालगृहे ततः ॥

तस्मात् मूलप्रवेशं यत् पुनरावर्त्तकं मतम् ।

पुनरावर्त्तकञ्चैव द्विविधञ्चेति कीर्त्तितम् ॥

युगे युगे तु संपूज्य जीर्णकालान्तरे गते ।

प्रासादे पतिते चैव लिङ्गे चलनसंयुते ॥

स्थानशान्तिं समावाह्य बालबिम्बे तु योजयेत् ।

प्रासादे पूर्ववत्कृत्वा संप्रोक्षणमथाचरेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं क्रमेण विध्येव द्विकालार्थं विधिं शृणु ।
अविकालं विकालार्थं मानोत्कृष्टञ्च कारयेत् ॥
मूलालयात् समावाह्य बालबिम्बे तु योजयेत् ।
पञ्चरं लिङ्गमित्याहु शिवञ्चैवतु कीरवत् ॥
तच्छक्तिं व्यष्टमध्ये वा बालबिम्बे तु योजयेत् ।
तल्लिङ्गं तच्छिवञ्चैव भावयेत् चित्रवर्त्तिवत् ॥
लिङ्गं पञ्चरमेवञ्च योजयेद्दारुपञ्जरे ।
तस्मात्तु दर्शितञ्चैव योजयेत् पञ्चरामतः ॥
विप्रवाक्यं शुभं घोष्य कारयेत्तु विकालकमिति ।

अथ भवने गर्भगृहे निष्पन्ने शिल्पिकृत्या-
चार्यकृत्याभ्यां समाप्ते सति अत्र शिल्पिकृत्य
स्वर्णेष्टकादिभिर्निर्माणम् । आचार्यकृत्यन्तु तद्विमान-
स्थ देवप्रतिमादीनां तत्र तत्र स्वङ्गादौ योजनम्
यथा कारणे

अङ्गप्रत्यङ्गविमानोर्द्धु स्थितानान्तु जीर्णोद्धारविधानतः ।?
प्रतिष्ठामेव कुर्वीत विमानोत्तमतान्वितः ॥
उद्धारे तु विमानानां कर्त्तव्यं या कृता भवेत् ।
सेदानीं कथ्यते तस्य विमानस्य चतुर्द्विधा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वीरतन्त्रे

प्रासादस्य चतुर्दिक्षु प्रपां कृत्वा तु पूर्ववत् ।

मध्यमे वेदिकां कुर्यात् शालिना विकिरेत्ततः ॥

वेदिकामध्यमे स्थाप्य दिक्पालान्देव कुम्भकान् ।

सकूर्चान् सापिधानांश्च सवस्त्रान्वारिपूरितान् ॥

अंशुमति

प्रासादकलशाद्बाह्ये पूर्वे चैन्द्रघटं न्यसेत् ।

149a दक्षिणे दक्षिणं कुम्भं विष्णुकुम्भं तु पश्चिमे ॥

उत्तरे ब्रह्मकुम्भं च विन्यसेत्तु यथाक्रमम् ।

परिवारघटान्स्थाप्य तत्तत्कुम्भप्रदक्षिणम् ॥

वीरतन्त्रे

......न्दक्षिणे भागे एवमेव क्रमेण तु ।

स्थापयेत्तूत्तरे भागे दुर्गाकुम्भं विशेषतः ॥

दिक्पालान्देवतामूर्ते विन्यसेत् घटमध्यमे ।

संपूज्य गन्धपुष्पाद्यैः स्वस्वमन्त्रेण देशिकः ॥

पायसान्नं निवेद्याथ दद्यात् ताम्बूलमुत्तमम् ।

खड्गन्तात् पार्श्वके न्यस्य दक्षिणे मुष्टिसंयुते ॥

मेदिनादि समभ्यर्च्य पश्चाद्धोमं समाचरेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्रकृतः पार्श्वशब्देन ईशानकुम्भावाहित प्रासादे-
शिवस्य पार्श्वमुच्यते । सखण्डोपि शानखण्ड इति
गद्यते । वीरतन्त्रे

वेदिकापूर्वदिग्भागे चतुरश्रं कुण्डमुच्यते ।
एवमेव प्रकारेण चतुर्दिक्षु च कारयेत् ॥

अंशुमति

आचार्य स्त्वीशादिक कुण्डे शिवाग्निं संप्रकल्पयेत् ।

वीरतन्त्रे

ततो होमं प्रकर्त्तव्य मग्निमुखञ्च पूर्ववत् ।

अजिते

तत्र देवाङ्गमूलैस्तु विधिवत्स्थापितेनले ॥
1426 |समिदाज्यचरूणान्तु प्रत्येकन्तु दशाहुतिम् ।
रात्रिशेषन्ततो नीत्वा प्रभाते देशिकोत्तमः ॥
कृतनित्य स्समभ्यर्च्य कलशेषु च देवता ।

वीरतन्त्रे

पलाशं पूर्वदिक्भागे अश्वत्थञ्चैव दक्षिणे ।
औदुम्बरन्तु वारुण्यां प्लक्षञ्चैवोत्तरादिशि ॥
शमीञ्चैव तु विश्वेशो दुर्गायास्तु पलाशकम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अष्टोत्तरशतं वापि पञ्चाशद्वापि हूयते ।
तत्र मूलेन विप्रेन्द्रः प्रत्येकन्तु शताहुतिः ॥

अजिते

पूर्णाहुतिञ्च सर्वत्र शिवाग्नेण प्रदापयेत् ।
ततश्चैशानकोणे तु कुम्भञ्चावाहितं शिवम् ॥
खड्गोर्ध्वं विन्यसेन्मूलमुच्चरन्सुसमाहितः ।
ततस्तेनाभिषिञ्चेयासिं ततो गन्धादि क्रमेण तु ॥
कुम्भस्थान्विन्यसेद्देवान् चतुरः पूर्ववत्सुधीः ।
अर्घ्योयः क्रमतस्सर्वं कलशैर्वाभिषेचयेत् ॥
ततस्तत् खड्गमेकं त्रसुगुप्तं सन्निधापयेत् ।?
एवं कृत्वा क्रियां पश्चात् प्रासादं सुमुहूर्तके ।
143a | उद्धृत्यकारयेत्पश्चात् प्रासादं विधिना सुधीः ॥
क्रियाक्रमद्योतिकायां मध्येवमेवोक्तम् ।

यथा

एवमेव विधिः कार्यो जीर्णधामस्समुद्धृतौ ।
खड्गमन्यागणन्यस्य कारयेन्मन्दिरान्तरम् ॥
शम्भवान् पूजयेत् ग्रामाश्रितस्तत्वं रक्षत् सर्वतात् ।
आचार्यो लिङ्गरक्षार्थं पूर्वमानेन कारयेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथवा तत्तद्वर्गदेवान् बाललिङ्गे वा योजयेत् ।

तदुक्तं क्रियाक्रमद्योतिकायां

होमादिस्थापिपर्यन्तं कर्म प्रतिविशेषतः ।

अक्षीणञ्च जीर्णञ्च लक्षणोक्तक्रमेण तु ॥

तत्तद्वर्गस्थितान्देवा बाललिङ्गे तु योजयेत् । इति

स्वायम्भुवलिङ्गस्य बाललिङ्गाभावात् स्वायम्भुवे-

सङ्कोचपटले

तद्ग्रामोद्धारविषये जनाः प्राकार उत्तरः ।

यथा स्वायंभुवादिके जीर्णे लिङ्गे संयोजयेत्सुधीः ॥

143b अथवा चललिङ्गे वा विक्षेपेण च योजयेत् ।

कारणे

देवांश्च तद्विमानस्थान् पीठाग्रे वा सुयोजयेत् ।

दैविके मानुषे वापि पदे संयोजयेत्सुधीः ॥

पैशाचे तु न कर्तव्यं मण्डपस्यान्तराळके ।

अष्टदिक्षु च कर्तव्यं भद्रपीठेथवा पुनः ॥

क्षीणं विमानं सङ्कल्प्य तस्मिन्नावाह्य रक्षयेत् ।

पीठाग्रे वाथ लिङ्गे वा यथा युक्ति यथा रुचि ॥

विमानस्थापनेकाले यथापूर्वन्नियोजयेत् । इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं देवतायोजनं शिल्पिकृत्यानन्तरं विमानप्रतिष्ठां
सत्यां पुनश्चविधिवत् आगमोक्तप्रकारेण मूले मूल-
लिङ्गे स्वशक्तिं बाललिङ्गावाहितां शक्तिं न्यसेत् ।
उद्वाहयेदित्यर्थः । तथोक्तमंशुमति -
प्रासादं देहमित्युक्तं देही लिङ्गमिति स्मृतम् ।
देहहीनन्तु तं कर्म तत्सर्वं निष्फलं भवेत् ॥
तस्मात्सर्वप्रयत्नेन विमानस्थापनान्वितम् ।
स्थूपिकीलप्रतिष्ठाच विमानस्थापनञ्चयत् ॥
144a शिवसंप्रोक्षणं चैव समतन्त्रेण कारयेत् ।
पृथक् तन्त्रेण वा कार्यं मष्टाङ्गं देशिकोत्तमैः ॥
मेदिनीसङ्ग्रहं बालस्थापनं प्रथमेष्टकाम् ।
गर्भमूर्द्धेष्टका धाम लिङ्गसंस्थापनन्तथा ॥
संप्रोक्षणं क्रमेणैव चाष्टाङ्गमितिकीर्तितः ।
सुप्रभेदे
संसिद्धेत विमाने तु स्थापने विधिमार्गतः ।
शिवलोकमवाप्नोति पूज्यमानस्सदामरैः ॥ इति
विमानस्थापनन्तु विस्तरेणाप्रदर्शितम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कारणे तद्यथा

अतः परं प्रवक्ष्यामि विमानस्थापनं परम्।
सर्वपापहरं पुण्यं सर्वसिद्धिकरं शुभम् ॥
हैमेनवाथ ताम्रेण दारुणा शिलयाथवा।
इष्टकाद्यादिभिर्वाथ हर्म्यं कृत्वा सलक्षणम्॥
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने।
शुभवारतिथियुक्ते प्रतिष्ठां सम्यगाचरेत्॥
विमानस्थापने हीने हर्म्येणास्थाप्य निष्फलम्।
तस्मात्सर्वप्रयत्नेन प्रासादस्थापनं कुरु ॥
अङ्कुरार्पणपर्व्ये धीमान् पूर्वोक्तविधिनासह।
144b प्रासादस्य चतुर्दिक्षु मण्डपन्तु प्रकल्पयेत् ॥
नवहस्ताष्टहस्तं वा सप्तहस्तमथापि वा।
कलास्तम्भसमायुक्तं द्वादशस्तम्भमेव च ॥
मण्डपस्य त्रिभागैकं मध्यभागे तु वेदिका।
रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम्॥
कुण्डानि परितः कुर्यात् मानुवेतु पदक्रमात्।
युगाश्रं योनि खण्डेन्दु त्र्यश्रं वृत्तमथाब्जकम्॥
सप्ताश्रं चैव वस्वश्रं मैन्द्रादिषु प्रकल्पयेत्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्राक्कुण्डवेदिकामध्ये वृत्तं प्राग्व्यानकं कुरु ।
हर्म्याग्रे मण्डपं ह्येवं कारयेल्लक्षणैस्सह ॥
अन्येषु मण्डपेष्वेवं कुर्यात्सर्वं युगाश्रकम् ।
वीरतन्त्रे विशे.. उक्तः
प्रासादस्य चतुर्दिक्षु चतुरश्रन्तु कुण्डकम् ।
नागरस्य विधिप्रोक्तं द्राविडस्य तु वृत्तकम् ॥
वेसरस्यार्द्धचन्द्राभं कुण्डानि कारयेत्ततः । इति
नवाग्न्यायतनं वापि पञ्चाग्न्यायतने तु वा ।
पञ्चाग्न्यायतनं चैत्तु विदिशासु विवर्जयेत् ।
प्रासादस्याग्रभागे तु मण्डपं स्कन्दमण्डपम् ॥
145 a हर्म्यस्यैवापरेभागे मण्डपं विष्णु/मण्डपम् ।
सौम्येब्जमण्डपं प्रोक्तं दक्षिणे त्वीशमण्डपम् ॥
अलङ्कृत्य वितानाद्यैः मण्डपानि विशेषतः ।
भूसुरान्भोजयेत्पश्चात् मण्डपान्प्रति बुद्धिमान् ॥
पश्चादुच्छिष्टमृद्भास्य गोमयेनोपलेपयेत् ।
कामिके
तदा प्रासाददेहस्स्वबेराणान्दृष्टिमोचनम् ।
मङ्गल्य धान्य गो विप्र कन्यानां दर्शनं द्विजाः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततो द्रुतय मन्त्रेण कृत्वा संप्रोक्ष्य गन्धतम् ।
संपूज्य गन्धपुष्पाद्यैः प्रासादं प्रोक्षयेत्ततः ॥

कारणे

विमानाभ्यन्तरे पश्चाद् द्वारस्तु होमं समाचरेत् ।
पर्यग्निकरणं हर्म्यं कुर्याच्चैव वह्निना ।
प्रासादं तन्तुनावेष्ट्य दर्भमालाभिरावृतम् ॥
स्थूप्याद्युपानपर्यन्तं नववस्त्रेण वेष्टयेत् ।
दुकूलपट्टदेवाङ्गैः कार्पासैश्च विभूषयेत् ॥

कामिके

वस्त्रैराच्छाद्य सर्वन्तु दर्भैः पुष्पैः परिस्तरेत् ।
मण्डपं संप्रविश्याथ पुण्याहं वाचयेत्ततः ॥

कारणे

द्वारपूजादिकं सर्वं स्थापनं क्रमवत् सुधीः ।
वेद्यूर्ध्वे स्थण्डिले कुर्यात् दृष्ट्रोणैश्चशालिभिः ॥
पूर्वे तु राजधान्ये स्तद्दक्षिणे श्वेतशालिभिः ।
अपरे कृष्णधान्यैस्तु सौम्यायां पीतशालिभिः ॥
तदर्द्धैस्तण्डुलैर्भूष्य तदर्द्धैश्च तिलैरपि ।
लाजैर्दर्भैः परिस्तीर्य स्थण्डिलं पूजयेद्धृता ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अजिते

शाकिचक्रं समभ्यर्च्य वेदिकादिषु पूर्ववत् ।

देवान् सर्वान् समभ्यर्च्य कुम्भानथ समाहरेत् ॥

कारणे

चत्वारो वेदिकास्तत्र पूर्वोक्तैर्लक्षणैर्युताः ।

शुक्लवस्त्रोष्णीषधरा शुक्लमाल्यैरलङ्कृताः ॥

शुक्लगन्धानुलिप्ताङ्गाः पञ्चाङ्गभूषणैर्युताः ।

स्कन्दादिमण्डपे चैव तत्र सर्वं कुर्युस्तु मूर्तिपाः ॥

पूर्वोक्तलक्षणोपेतान् विन्यसेत् स्थण्डिलोपरि ।

अजिते

द्रोणपूर्णान्यव्रणान् पञ्च पूर्ववल्लक्षणान्वितान् ।

पञ्चसु स्थापयेन्मध्ये वेदिकासु समन्ततः ॥

प्रत्येकमष्टौ परितः तदर्द्धपरिमाणकान् ।

तादृशानथ कुम्भांस्तु विन्यसेद्दिक्षु दिक्षु च ॥

एवं विन्यस्य कुम्भांस्तु पुण्याहं वाचयेत्ततः ।

ततः प्रासादमध्ये तु प्रोक्षयित्वा तदम्भसा ॥

पञ्चगव्येन संप्रोक्ष्य ~~ब्रह्म~~ पञ्चकमुच्चरन् ।

पुण्याहं वाचयित्वान्ते कौतुकं बन्धयेत्सुधीः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थूप्यां पूर्वं शिवास्त्रेण ततश्चाग्रस्थितस्य तु ।
देवस्य वस्त्रदाबद्ध्वा ततोन्येषामपि क्रमात् ॥
गर्भस्थितानां देवानां प्रादक्षिण्यक्रमेण तु ।
स्वस्वहेतिं समुच्चार्य वृषाणामपि बन्धयेत् ॥
दक्षिणे शृङ्गमूले तु ततस्सर्वान्नवाम्बरैः ।
स्थूप्यादीन्वेष्टयेन्मन्त्री तत्तत्कवचमुच्चरन् ॥
सर्वेषु कुम्भकूर्चन्तु मालया सह बन्धयेत् ।
प्रणवं स्तुथमुच्चार्य ततश्शिरस्वरमङ्कुरैः ॥
कर्णिञ्च प्रस्तरं पाद माभिषिच्य समाहितः ।
पञ्चगव्येन सर्वत्र प्रोक्षयेत् गर्भमस्त्रतः ॥
ततः पाद्यादिभिर्द्रव्यं हविरन्तैः क्रमद्यजेत् ।
ततो बहिर्विनिष्क्रम्य शृङ्गारमण्डपे गुरुः ॥
16b होत्राभिस्सह मन्त्रज्ञो चतुर्भिस्सह मण्डपम् ।
शिवास्त्रेण तु संप्रोक्ष्य कृतविद्यातनुर्गुरुः ॥
पूजयेत् कुम्भगान्देवान् तद्विधानमथोच्यते ।
स्कन्दस्य मण्डपे वेद्यां शिवकुम्भं तु मध्यमे ॥
विन्यस्य तस्य मध्ये तु पञ्चरत्नं विशेषतः ।
ध्यात्वा सदाशिवं तस्मिन् शिवकुम्भे तु विन्यसेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्द्धनीं तस्य वामे तु तस्यां हैमं विनिक्षिपेत् ।
ध्यात्वा मनोन्मनीं तस्यां तन्मूलेन तु विन्यसेत् ।
स्कन्दकुम्भं न्यसेद्धीमान् शिवकुम्भस्य दक्षिणे ।
पञ्चरत्नं क्षिपेत्तस्मिन् ध्यातु स्कन्दस्वरूपकम् ॥
तन्मूलन्तु न्यसेत्तस्मिन् गन्धपुष्पादिभिः क्रमात् ।
तत्तदीशानमन्त्रैश्च पूजयेत्तु विशेषतः ।
लिङ्गमुद्राञ्च पद्माख्यां शक्तिमुद्रां प्रदर्शयेत् ॥
कुमारं षण्मुखं चैव सुब्रह्मण्यं सुराष्ट्रजम् ।
सेनापतिस्सुरेशञ्च कार्त्तिकेयं गुहं क्रमात् ॥
पूर्वादिषु घटेष्वेतान् न्यसेत्तत् बीजमन्त्रकैः ।
तत्तदीशानमन्त्रेण गन्धपुष्पादिभिर्यजेत् ॥
ईशस्य मण्डपे वेद्यां स्थण्डिलोपरि मध्यमे ।
प्रधानकुम्भं न्यस्त्वा तु दक्षिणामूर्त्तिपकम् ॥
ध्यात्वा महेशबीजन्तु विन्यसेत् घटमध्यमे ।
परितोऽष्टघटेष्वेतान् भवादीन् पूर्वतो यजेत् ॥
भवं शर्वन्तथैशानं पशुपतिं रुद्रमेव च ।
उग्रं भीमं महादेवं यजेत्पूर्वादितः क्रमात् ॥
विष्णुमण्डपवेद्यान्तु स्थण्डिलोपरि मध्यमे ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रधान कुम्भं न्यसेत्वा तु तन्मध्ये विष्णुरूपकम्।
ध्यात्वा बीजं तु विन्यस्य गन्धादिभिर्यजेद् गुरुः॥
सङ्कर्षणश्च प्रद्युम्नो वासुदेवोऽनिरुद्धकः।
रामश्चैवाच्युतश्चैव नारसिंहश्च वामनः॥
क्रमेणैतांस्तथा सर्वानष्टकुम्भेषु पूजयेत्।
ब्रह्ममण्डपके वेद्यां स्थण्डिलोपरि मध्यमे॥
प्रधानकुम्भं विन्यस्य तन्मध्ये ब्रह्मरूपकम्।
ध्यात्वा बीजं न्यसित्वा तु पूजयेत्पुरुषेण तु॥
त्रयीमूर्तिं त्रिमूर्तिं च पद्माढ्यं पद्मयोनिकम्।
चतुर्मुखं च धातारं पितामहमजं तथा॥
तत्तन्मन्त्रैः क्रमान्न्यस्त्वा दिक्कानेनाभितो यजेत्।

अजिते

सर्वं संपूज्य देवांस्तान् गन्धाद्यैः स्वस्वनाम..भिः।

कारणे

147 b कुर्यात् हवनं कुर्युः स्थितु दिक्षु क्रमेण तु।
देशिको मूर्तिपैः सार्द्धं होमकर्म समारभेत्॥

अजिते

चत्वारस्तु प्रधानास्ते होतारोऽन्ये च पुत्रकाः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मण्डपं प्रति चत्वारस्तौ स्तैः पूजांसमारभेत ॥
गकास्थितांस्तु तान्देवान्मद्ध्यकुम्भेषु योजयेत ।
अग्रेन्येषु च कुम्भेषु प्रागादिषु यथाक्रमम् ॥

कारणे

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
पलाशखदिरावैत्थन्यग्रोधाः प्लक्षशावच ॥
शमीबिल्वमपामार्गं पलाशञ्च क्रमेण तु ।
इन्द्रादि विष्णुकुण्डानां समिधस्संप्रकीर्तिताः ॥

अजिते

ततः प्रधारकुण्डेषु प्रधानवह संस्थितान् ।
देवानभ्यर्च्य सर्वत्र होमयेत्समिधादिभिः ॥
प्लक्षोदुम्बरमश्वत्थं वटं पूर्वादितः क्रमात् ।
पलाशन्तु प्रधानस्य सर्वत्रसमिदुच्यते ॥

कारणे

समिदाज्यचरून्लाजान्सर्षपांश्च यवांस्तिलान् ।
वैणवं शालिमाषञ्च निष्पावञ्च क्रमेण तु ॥
तत्तद्ब्रह्मषडङ्गैश्च समिदादीनि होमयेत् ।
शतमर्द्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अजिते

होमकाले तु सर्वेषु मण्डपेषु क्रमादिभिः ।
चतुर्भिश्च चतुर्दिक्षु वेदैरध्ययनं भवेत् ॥
सर्वत्राङ्गदेशे भवेदस्त्रजपस्तदा ।
गुरु र्वृषेन्द्र मूलाद्यैः प्रत्येकन्तु शताहुतिः ॥
आज्येन होमयेदन्ते विद्याद्यैश्च ततो गुरुः ।

कारणे

द्रव्यान्ते व्याहृतिं हुत्वा भवनं स्पर्शयेत्ततः ।
द्रव्यं प्रति ततो हुत्वा तन्त्राद्दिशासु वर्मणा ॥
स्पृष्ट्वाधिष्ठानभागन्तु व्याहृतिं जुहुयात्ततः ।
तेषां स्वनाम मन्त्रेण जुहुयाच्च शतसङ्ख्यया ॥
सर्वं जागरणं रात्रौ प्रभाते स्थापनं कुरु ।

वीरतन्त्रे

प्रभाते विमले चैव आचार्यस्नानमाचरेत् ।
मन्त्रन्यासेन मार्गेण न्यासं कृत्वा विशेषतः ॥
ततोवसानहोमञ्च कर्तव्यं देशिकोत्तमः ।
समिदाज्यचरूणान्तु प्रासादेनशताहुतिः ॥
विमानबीजसंयुक्तं पञ्चविंशाधि कल्पते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सप्तमे चान्तवर्णेण मकारन्तु द्वितीयकम् ।
148b चतुर्दशस्वरोपेतं बिन्दुनादसमन्वितम् ॥
विमानस्य तु विप्रेन्द्र मूलमन्त्रमिहोच्यते ।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ॥
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।
चित्तादिभिर्जयादिभ्यो राष्ट्रभृच्चैव हूयते ॥
हुत्वान्ते तु यदस्येति पूर्णाहुतिमथाचरेत् ।
आचार्यदक्षिणां दद्यात् पञ्चाङ्गभूषणैर्युतम् ॥

कारणे

यद्वा हेमाङ्गुलीयाद्यैर्दक्षिणां संप्रपूजयेत् ।
दक्षिणां दापयेत्तेषां त्रिंशन्निष्कन्तु चोत्तमा ॥
तदर्धं मध्यमा ज्ञेया तदर्धं कन्यसा भवेत् ।
दक्षिणां द्विगुणां दद्यात् गुरवे स्कन्दमण्डपे ॥

वीरतन्त्रे

क्षीरस्युपरि विप्रेन्द्र कुम्भमुद्वाहयेत्ततः ।
विमानप्रदक्षिणं कुर्यात् प्रासादस्योपरिस्थितः ॥
विमानमूलसंयुक्तं व्योमव्यापिसमुच्चरन् ।
पञ्चब्रह्मषडङ्गैश्च स्नापयेत्कुम्भमेव च ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वादीशानपर्यन्तं स्नापयेत्स्वस्वमन्त्रतः ।

दिक्पालमूर्तिं च विप्रेन्द्र स्वस्वमन्त्रेण स्नापयेत् ॥

149a गन्धपुष्पादिनाभ्यर्च्य हविर्दद्यात् द्विशेषतः ।

कारणे

स्थूलबिम्बे कलादीनां विन्यसेद्विधिपूर्वकम् ।

देहं विमानमित्युक्तं देहो लिङ्गमिति स्मृतम् ॥

सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समारभेत् ।

ध्यात्वा सदाशिवं कुम्भमन्त्रं स्थूलाग्रके न्यसेत् ॥

वर्द्धन्यां बीजमादाय तद्धामे च प्रपूजयेत् ।

वीरतन्त्रे

गन्धपुष्पादिनाभ्यर्च्य हविर्दद्याद्विशेषतः ।

ब्राह्मणान्भोजयेत्तत्र शिवभक्तांश्च भोजयेत् ॥

सप्तकन्याश्च विप्रेन्द्र वस्त्रादीनि च दापयेत् ।

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥

ब्रह्मविद्यायै नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथ प्रकार गोपुरमण्डपादीनां समान
क्रियत्वादेकेनैव श्लोकेनोद्धार क्रममाह -

प्राकार गोपुर समण्डप वास्तु कुण्ड-
मूलालयस्य परिवार गृहे च जीर्णे ।
यत्किञ्चिदङ्ग विकले सति तत्तदङ्गं
सन्धाय सर्व विकले तु तथोद्धरेच्च ॥

प्राकारान्तर्मण्डलान्तर्हारमध्यहारमर्यादा -
महामर्यादाख्याः गोपुराणि एकभूमि प्रभृति षोडश
149b भूमिपर्यन्तानि । मण्डपानि चतुस्तम्भादि सहस्र-
स्तम्भान्तानि वास्तु स्वस्तिकादि, कुण्डानि चतु-
रश्रादीनि नवकुण्डादीनि मूलालयस्थानि परिवार-
गृहाणि विनायकालयादीनि तेषु सर्वेषु सर्व -
द्वन्द्वानां विभाषैकवच्च भाव इति एकवत् भावा-
देकवचनम् । एतेषु जीर्णेषु सत्सु जीर्णत्वञ्च
यत् किञ्चिदङ्गवैकल्यं सर्वाङ्गवैकल्यञ्चेति द्विविधम्
तत्र यत्किञ्चिदङ्गवैकल्ये सति तत्तदङ्गं सन्धाय
सर्वाङ्गवैकल्ये सति तथा । पूर्वद्रव्यैरेव पूर्वप्रमाणे-
नैव उद्धरेत् । चकारादधिकद्रव्यैरधिकमानेन -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

च्योद्धारे न दोषः । तथाचोक्तं कामिकादौ-

प्राकारे गोपुरे जीर्णे पतिते स्फोटनादिके ।

राज्ञो भयकरे प्रोक्ते शान्तिहोमं ततो नयेत् ॥

ततः संप्रोक्षणं कुर्यात् सन्धाने स्फोटनादिषु ।

कृत्वागण्येन संप्रोक्ष्य शान्तिहोममथाचरेत् ॥

वास्तुविद्याप्रकाशे

बाह्ये प्राकारसालादि विभ्रान्ते प्रच्युतेऽथवा ।

150a पूर्ववद्वाधिकं हीनं यथेष्टं कारयेच्छुभम् ॥

अन्तर्मण्डलसालादि मर्यादावरणान्तिकम् ।

न हीनाधिकभावेन कल्पयेत्कल्पवित्तमः ॥

अत्राधिक.. हीनं वा यथेष्टं कारयेदित्यत्र पञ्च

प्राकारस्य त्रिप्राकारत्वं त्रिप्राकारस्य तस्यैकप्राकारं

त्वञ्च विवक्षितम् । जीर्णोद्धारस्य यथाशक्ति विषयत्वात्

तथाचोक्तं वास्तुविद्याप्रकाशे

पञ्चप्राकारयुक्तं वा त्रिप्राकारयुतन्तु वा ।

एकप्राकारसंयुक्तं कल्पयेत्कल्पवित्तमः ॥

मर्यादाभित्तिं त्यक्त्वान्तर्मण्डलकं तथा ।

शेषप्राकारकैर्युक्तं त्रिप्राकारमिहोच्यते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथ सावंप्रकारेण त्रिप्रकारमिहोच्यते ।

अन्तर्मण्डलकञ्चैव मर्यादामध्यहारकम् ॥

त्यक्त्वैवान्यत्तु शेषञ्च त्रिप्राकारमिहोच्यते ।

एकप्राकारकञ्चेत्तु पुनर्हारायुतं कुरु ॥ इति

कारणे

प्राकारे जीर्णिते तत्र कुर्याद्वृद्धारणं क्रमात् ।

एकदेश विहीनश्चेत् पुनस्सन्धानमाचरेत् ॥

आसमन्ताद्विशीर्णञ्चेत् तन्मूलान्तं समुद्धरेत् ।

150b आलेष्टकां ततः क्षिप्य प्राकारन्तु समारभेत् ॥

तस्माद्वीनान्नकर्तव्यं कर्तव्यमाधिकं शुभम् ।

तथा

पौराण्यं देवसदनं पौराण्यं कूपमेव च ॥

पुराणासद्वृक्षादि नच्छेद्यन्न त्यजेत् बुधः ।

तेषां बहि प्रदेशे तु कुड्यं भद्राकृतिं न्यसेत् ॥

अज्ञानात्कुरुते तेषां भङ्गं पर्याद्विपत् भवेत् ।

तस्मात्परिहरेत्तानि बहिरावरणान्यसेत् ॥

गोपुरं । सुप्रभेदे

जीर्णे तु गोपुरे तत्र प्रासादस्योक्तवत्कुरु ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अन्येषां मण्डपादीनां भवेन्नस्योक्तमार्गतः ।

कामिके

मण्डपे परिवारे च परिवारालये पुनः ।
अनुकर्मविधिं प्राग्वत् विधिना कल्पयेत्ततः ॥

प्राग्वत्प्रासादोक्तवदित्यर्थः ।

निश्वासे

मण्डपे जीर्णदेशे तु उद्धृत्य स्थापयेन्नवम् ।
परिवारालये जीर्णे तद्वत्सन्धानमाचरेत् ॥

कारणे

प्राकारमण्डपादीनां यज्जीर्णं तत्र तद्विना ।
कुर्यात्तत् पूर्ववद्धीमान् सुदृढं हि मनोरमम् ॥
अन्यथा यदि कुर्याच्चेत् सर्वदोषावसुन्नृणाम् ।
सर्वनाशो भवेत्तत्र सर्वं निष्फलमेव च ॥

151a | सूक्ष्मे

मण्डपे जीर्णिते काले पूर्वोक्तविधिना कुरु ।
प्राकारे जीर्णिते तत्र सन्धानं पूर्ववत्क्रमात् ॥
कर्णकूटादिहीनश्चेत् द्वारे वलयं लता ध्वोन्तरेत् ।
प्रथमेष्टकां न्यसेत्तत्र कौलजे कौलजं क्रमात् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुरातनकृतात् कालात् प्राकारं न समं यदि ।
मुखादन्यत्र सर्वेषु समं कुर्याद्विधानतः ॥
पुरातनकृतात् कालात् सलक्षणयुतं यदि ।
तेन्मानेनाकर्तव्यं शालानामपि सर्वशः ॥
इष्टकाजीर्णदेशेषु पुनस्सन्धानमाचरेत् ।
शिद्धयाशैलजाभिश्च मानाधिक्यन्ततो भवेत् ॥
एवमेवप्रकारेण गोपुरादीनि कारयेत् ।
चारयोगादिजीर्णेषु तानेव सङ्ग्रहेत्प्रयत्नात् ॥
स्थपतिश्च विशेषेण शास्त्रमार्गेण कारयेत् ।
पश्चान्नानेव सङ्गृह्य नाहिं च स्तरभि क्रमात् ॥
पश्चात्तत्प्रदेशेषु योजयेत् स्थपतिस्तथा ।
एवंविधप्रकारेणाद्दशाशैलं कारयेत् ॥
कूटे च मालिकायान्तु जीर्णकाले तथोद्धरेत् ।
15 | b नवकर्मप्रकुर्यात्तु यथालाभं च सङ्ग्रहेत् ॥
वास्तु । कामिके
जीर्णवास्तोस्तु मानाद्यावनुक्तं मासमाश्रिते ।
पुनश्शास्त्रोक्तमार्गेणाधिकं मानादिभिर्युतम् ॥
कर्तव्यं विजयामुख्य नृपतेर्नित्यमादिशेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वमानादिषु क्षीणं पुनः क्रमेण कारयेत् ।
यदि मोहेन कुर्वीत सर्वदोषास्पदं हि तत् ॥

कामिके

ततो वृद्धिक्षयौ वास्तौ नृपतेर्विपदाकरौ ।
स्वप्रमाणे यथाशास्त्रो विहितालङ्कृतान्विते ॥
अप्रमाणेन्यथा चेत्तु तत्र दोषो न विद्यते ।
प्रकाशात्प्रागुदग्वृद्धिः प्रतीच्यां रिपुभिः क्षयम् ॥
दक्षिणे मरणं स्याद्धि तस्माद्वृद्धिर्न चेष्यते ।
तद्वास्तोः परितो वृद्धिः समा वा विषमापि वा ॥
ग्रामादीनां गृहादीनां शालानां च विशेषतः ।
आरम्भो व्यासदैर्घ्याभ्यां हीनन्नेष्टं मुनीश्वराः ॥
स्समं वा योजयेत्तस्माद्वाधिकं वापि योजयेत् ।
युक्तितः परितो वापि प्रागुदग्दिशि वर्द्धयेत् ॥
गृहमालिकयोर्भूमिं सङ्ख्यया परिकल्पयेत् ।
सर्वमानोचितं हीनं कुर्याद्वृद्धिं क्रमेण तु ॥
उक्तानामपि सर्वेषां विशेषः कश्चिदुच्यते ।
152a हीनं कुर्याद्गुरुद्रव्ये स्समं वा तत्र पूर्ववत् ॥ इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वज्ञानोत्तरे

ग्रामरवेट पुरे वापि यथाविभवविस्तरैः।
विस्तृताद्यन्नकुर्वीत महापुण्यचिकीर्षया॥
सर्वान्कामानवाप्नोति यथोक्तेन तु कर्मणा।

कुण्डजीर्णोद्धारस्त्वाजिते

नित्याग्निकुण्डे जीर्णे तु तत्पूर्वे वा तथोत्तरे।
सैकतं स्थण्डिलं कृत्वा तत्राग्निं कुण्डतो न्यसेत्॥
यात्राहोमन्तु कृत्वादौ तत्र होमं प्रकल्पयेत्।
यावत्कुण्डं समाप्तिस्स्यात् पश्चादग्निन्निकेतने॥
स्थापयित्वा ततश्चापि यात्राहोमन्तु कारयेत्।
ततश्चापि प्रकुर्वीत नित्यहोमं विधानतः॥ इति

परिवारजीर्णोद्धारः। कारणे

परिवारालये जीर्णे त्वालयस्योक्तवत्कुरु।
पूर्वं कृत्वा पुनः कुर्यात्क्रमेणैव विचक्षणः॥
..न्यं कृत्वाकृतञ्चेत्तु सर्वदोषसमुद्भवः।
स्थापनेचोक्तदेशे तु तद्विनाशंभमन्त्रकैः॥
उक्तस्थाने प्रकर्तव्यं परिवारादिकं क्रमात्।
जीर्णितेचात्र बिम्बे तु उद्धरेच्च विशेषतः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्तद्धामाग्रके पीठं कृत्वा मूर्तिं समर्चयेत् ।
159b स्थापनोक्तक्रमेणैव बिम्बं संस्थापयेन्नवम् ॥
परिवारालयं पीठं प्राकारं गोपुरं तथा ।
प्रतिमामण्डपादीनि मण्डपाद्यैः सभान्तथा ॥
पुरास्तुमाननिर्याणि पुनः कर्माधिकं भवेत् ।
स्वोक्तस्थानगतो वापि पुनर्बाह्यगतं तु भम् ॥
बाह्ये चैवाग्निमस्थाने कर्त्तव्यास्ते सलक्षणाः ।

वातुले

परिवारविहीने च दासीदास विनाकृतम् ।
स्थापयेत् पूर्ववत् पश्चात् कृत्वा तत् स्थापनोक्तवत् ॥
परिवाराङ्ग वैकल्ये पुनस्सन्धानमाचरेत् ।

सुप्रभेदे

परिवारालये हीने पूर्ववत्परिकल्पयेत् ।
तत् बिम्बपतिते भिन्ने च्छिन्ने भेदे तथैव च ॥
हुत्वा तु शिवमन्त्रेण कुर्याद्बिम्बानि पूर्ववत् ।
प्रतिष्ठां कारयेत्प्रागवत् स्वे स्वेन विधानतः ।

अंशुमति

प्राकारं बलिपीठं च मण्डपं गोपुरं तु वा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परिवारालये वापि जीर्णञ्चाभिन्नमेववा ।
तत्तद्दृढं पुनः कुर्यात् पूर्वद्रव्यैर्दृढीकृतम् ॥
कारणे

53a खण्डस्फुटितसंजारं प्रासादेयस्समारभेत् ।
रुद्रलोके भवेत्तस्य तस्मिन्भोगमवाप्नुयात् ॥
एवं संस्थापितेर्धाम ये पश्यन्ति नरोत्तमाः ।
पञ्चपातकिनो वापि ते यान्ति परांगतिम् ॥

॥ इति जीर्णोद्धारे प्रथम परिच्छेदः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथैवमालय जीर्णोद्धार मुक्त्वा लिङ्गलक्षण

पूर्वकं लिङ्गजीर्णोद्धारमाह-

लिङ्गस्थावजङ्गमादिभिद्ध्वा द्व्यानुपूर्वं पुन -

षड्भेदं क्षणिकादि भेदवत स्तत्रापि चाक्षुरिवनौ ।

अष्टाष्टापि च सप्तध्या च नवध्या भेदाः क्रमास्युः पुनः

प्रोक्तं मानुषके पुनर्द्विविधं ध्याराभुरवाद्यै भवेत् ॥

लिङ्ग भूतानि लयमस्मिन गच्छन्तीति लिङ्गम्

तदुक्तं सुप्रभेदे

लयं गच्छन्ति भूतानि संहारे निखिलायतः ।

सृष्टिकाले पुनस्सृष्टिं तस्मात् लिङ्गमुदाहृतमिति ॥

यत लिङ्गं जङ्गमञ्चेत्यास्यास्याभिध्याय भेदस्य तथा

द्वेध्या स्थावर जङ्गमामेति द्विध्येत्यर्थः ।

तदुक्तं कारणे

अतः परं प्रवक्ष्यामि लिङ्गलक्षणमुत्तमम् ।

153b |स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते ॥

शिलामयन्तु यद्रूपमजविष्णुहरैर्युतम् ।

त्रिसूत्रमुकुलैर्युक्तं स्थावं लिङ्गमुच्यते ॥

शेषाण्यन्यानि सर्वाणि जङ्गमं लिङ्गमुच्यत इति ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्पुनर्द्विविधमपि । पुनः क्षाणिकादिभेदवशात् क्षाणिकं
मृण्मय रत्नलोहज दारुज शैलज भेदात् षड्भेदम् ।
तथोक्तं सुप्रभेदे

क्षाणिकञ्चैव मृल्लोहा रत्नजन्दारुजन्तथा ।
शैलजञ्चैव विज्ञेया षड्भेदं लिङ्गमुच्यते ॥ इति

तेषामपिभेदानाह तत्रापिचेति । अर्क द्वादशभेदाः ।
अवनौ द्वौभेदौ । अष्ट अष्टभेदाः पुनरप्यष्टभेदाः ।
सप्तधा सप्तभेदा नवधा नवभेदा एवंक्रमास्युः ।
क्षाणिकं द्वादशभेदम् । मृण्मयं द्विभेदम् । दारुज-
मष्टभेदम् । लोहजञ्चाष्टभेदम् । रत्नजं सप्तभेदम् ।
शैलजं नवभेदम् । तथाप्युक्तं सुप्रभेदे

क्षाणिकं द्वादशं प्रोक्तं मृण्मये द्विविधं पुनः ।
दारुजञ्चाष्टधाप्रोक्तं अष्टधालोहजं स्मृतम् ॥
154a सप्तधा रत्नजञ्चैव शैलजञ्चचतुर्विधमिति ॥

एतेषां क्षणि फलञ्चापि सुप्रभेदे-

रत्नजं लोहजञ्चैव बाणलिङ्गं चलं स्मृतम् ।
शैलं चलाचलं प्रोक्तं मृण्मयन्दारुजन्तथा ॥
क्षाणिकानां फलं वक्ष्ये सैकतं मोक्षकाङ्क्षिणाम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तण्डुलं विभवार्थीनां अन्नमन्नप्रदं स्मृतम् ।
नवनीतं भूमिलाभस्यात् गोमयं रोगनाशनम् ॥
नवनीतं मनोह्लादं रुद्राक्षं ज्ञानवर्द्धनम् ।
गन्धं सौभाग्यकाङ्क्षिणां कूर्चजं वर्द्धिनां स्मृतम् ॥
आयुष्यवर्द्धनं पुष्पं गुडमिष्टार्थसिद्धिदम् ।
पैष्टं पुष्टिप्रदं प्रोक्तं शाणिकानां फलं भवेत् ॥
एतेषां चैव लिङ्गानां न प्रमाणं न चास्थितिः ।
मृण्मयं राज्यफलदं पक्वापक्वप्रभेदकम् ॥
शुद्धदेशे मृदं गृह्य पूजाभागं सयोनिकम् ।
कृत्वा दग्धमिदं पक्वं तत्रापक्वमिहोच्यते ॥
कामिके
शीताख्यां मृदमादाय पयस्तेन द्रवीकृतम् ।
यवगोधूमचूर्णञ्च पयो वृक्षत्वचान्वितम् ॥
पिच्छिलेन सुगन्धेन चूर्णान्यालोड्य समं मृदा ।
श्रीवेष्टकं सर्जरसं तथा गुलगुलु शार्करम् ॥
1546 पञ्चनिर्यास संयुक्तं मयलोकप्रसिद्धितः ।
एतेषां सदृशं तुल्यं मृतं गृहीत देशिकः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रभेदे

चूर्णैरालोड्य सुमृदं मासपक्वोषितन्तथा ।
रत्नबीजसमायुक्त मपक्वं लिङ्गमाचरेत् ॥
लोहजञ्चाष्टभेदो यथा -
सुवर्णं राजतं ताम्रं कांस्यमारपाकूटकं तथा ।
आयसं सीसकं चैव त्रिपुकञ्चेति लोहजम् ॥
सौवर्णं श्रीप्रदं प्रोक्तं राजतं राज्यसिद्धिदम् ।
ताम्रं पुत्रप्रदं चैव विद्वेषं कांस्यमेवच ॥
आरकूटं तथोच्चाटे श्यकारक्रमायसम् ।
सीसजं रोगकरणं त्रपुचायुष्यवर्द्धनम् ॥
एवन्तु लोहजं प्रोक्तं ततो रत्नज मुच्यते ।
मौक्तिकञ्च प्रवालञ्च वैडूर्यं स्फटिकं तथा ॥
पुष्यं मरतकं नीलं रत्नजं संप्रकीर्तितम् ।
लोहरत्नादिके लिङ्गे पूजाभागसपीठिकम् ॥
यथालाभप्रमाणेन स्फटिकादीनि कारयेत् ।
स्फटिकादिषु कर्त्तव्या त्रिभागैरेवपीठिका ॥
तदायामसुविस्तारा पिण्डिका शुभदा स्मृता ।
एकाङ्गुलं समारभ्य चतुर्विंशत्यङ्गुलान्तकम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लोहजं लिङ्गमित्याहुर्लक्षणोद्धारणं विना ।

दारुजाष्टकं यथा

शमी मधूक मण्डूक कर्णिकारं तथैव च ।

तिन्दुकार्जुनौ चैव पिप्पलोदुम्बरं तथा ॥

कामिके बहुव उक्ताः । यथा

खदिरं चन्दनस्सालो मधूकस्सरको मतः ।

बिल्वं कदम्ब बदरौ देवदारुश्च शिंशपा ॥

~~पद्मार्जुन~~

पद्मार्जुना वकोकश्च करिणो रक्तचन्दनः ।

स्निग्धसाराश्च ये वृक्षाः पलाशान्ये तु मध्यमा॥ इति ॥

शैलजञ्च ब्राह्मणादि चतुर्वर्णानुसारेण चतुर्विधम् ।

सुप्रभेदे

शिलाश्चापि सुविज्ञेया जातिभेदात्परीक्षणैः ।

श्वेता रक्ता तथा पीता कृष्णा चेति चतुर्विधा ॥

गोक्षीर शङ्खवर्णाभा ब्राह्मणानां प्रकाश्यते ।

जपा बन्धूकपुष्पाभा नृपाणां प्रोच्यते क्रमात् ॥

रजनी स्वर्णसदृशा वैश्यानान्तु प्रकाश्यते ॥

माषमुद्गगलु सङ्काशा शूद्राणान्तु समृद्धिदा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

155b सर्वेषान्तु कीलाकृष्णा सर्वसंपत्करस्मृता ।
सा चोषरजलक्लिन्ना तप्ताचार्कस्य रश्मिभिः ॥
अग्निदग्धान्यथुक्ता वा वर्जयेत्तां प्रयत्नतः इति
शातद्वारकीलार्थं, दारुकीला सङ्ग्रह प्रकरणोक्त
प्रकारेण गृहीतव्याः । कौलजे नव भेदो यथा ।
सुप्रभेदे
दिव्यं स्वायंभुवं पूर्वं दैविकं गाणपन्तथा ।
आसुरं सुरलिङ्गं च आर्षं राक्षसन्तथा ॥
मानुषं बाणलिङ्गं च लिङ्गं नवविधं भवेत् । इति
शातेषां लक्षणं यथा
पताका डमरकारा रुद्राक्षाकृतिरेव च ।
आज्यं वा मधुगन्धं वा पाताळ पर्वताकृति ॥
इत्येतैल्लक्षणं प्रोक्तं लिङ्गं स्वायंभुवस्य तु ।
दिव्यं स्वायम्भुवं पूर्वं उत्तमोत्तममेव च ॥
दैवतं गाणपं प्रोक्तं मद्ध्यमोत्तममेव च ।
आसुरं सुरलिङ्गं च आर्षं चाधमाधमम् ॥
मानुषं लिङ्गमेवोक्तं मद्ध्यन्त्वधमो भवेत् ।
बाणलिङ्गस्य नैवोक्तं लक्षणं तु विसर्जयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अत्र दैविकलक्षणं मकुटे -

दैविकञ्चार्षकञ्चैव गाणपं मानुषं तथा ।

स्थानं चतुर्विधं लिङ्गं दैविकेलक्षणं शृणु ॥

156a | दीर्घाकारं भवेल्लिङ्गं निम्नोन्नतसमन्वितम्

रेखाकोटरसंयुक्तं टङ्कफुल्लसमायुतम् ।

यवोन्नतमुखेभ्यासा करान्जलि पुटाकृति ॥

ब्रह्मसूत्रविहीनञ्च दैविकन्त्विहोच्यते ।

कूष्माण्डस्य फलाकारं मातुलुङ्गफलाकृति ॥

उर्वारुकफलाकारं कपित्थस्य फलाकृति ।

तालीफलवदाकारं गाणपं लिङ्गमुच्यते ॥

मूलस्थूलं भवेल्लिङ्गं नालिकेरफलाकृति ।

लिङ्गमार्षकमाख्यातं ब्रह्मसूत्रविवर्जितम् ॥

द्वारं वा गर्भमानं वा हस्तमानमथापि वा ।

शिवशास्त्रोक्तमार्गेण शिरोवर्तनयायुतम् ॥

ब्रह्मसूत्रसमायुक्तमेतन्मानुषमुच्यते ।

कामिके

स्वायम्भुवं बाणलिङ्गं दैविकञ्चार्षकन्त्विति ।

गाणपं मानुषं लिङ्गं षट्प्रकारं प्रकीर्तितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यत् स्वैनैवोत्थितं लिङ्गं स्वायंभुवमुदाहृतम्।
शिवेन संस्तुतं यत्तु बाणलिङ्गमुदाहृतम् ॥
देवैस्संस्थापितं दैवमार्षकं ऋषिपूजितम्।
गणैस्संस्थापितं लिङ्गं गाणपन्तदुदाहृतम् ॥

मानुषं मनुजैश्शिष्टैः स्थापितन्तदुदाहृतम्। इति
मानुषलिङ्गं च दशभेदो यथा

लिङ्गनिर्णये

समलिङ्गं वर्द्धमानं शैवाख्यैक्यञ्च स्वस्तिकम्।
सार्वदेशिकलिङ्गञ्च त्रैराशीक सहस्रकम् ॥
धारालिङ्गञ्च शैवाख्यं मुखलिङ्गमुदाहृतम्।
लिङ्गञ्च दशभेदं स्यात् मानुषे तत्प्रकीर्त्तितम् ॥
स्वायम्भुवादिलिङ्गानां स्थानमानन्न विद्यते ।

किरणे तु

स्वयम्भूतलिङ्गस्य स्थापितस्य महर्षिभिः।
दैवे वा स्थापितस्यापि रूपमानन्न विद्यते ॥
तल्लिङ्गाकृतिरूपेण नामभेदं पृथक् पृथक्।
ज्ञातव्यं फलतश्चायं साधकेन यथार्थतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रभेदे

चतुरश्रमधोभागं अष्टाश्रं मध्यमं भवेत् ।

तदूर्ध्वं वृत्तमेवं स्यात् त्रिभागं सर्वतस्समम् ॥

समाल्लिङ्गमिति प्रोक्तं वर्द्धमानं ततः शृणु ।

चतुर्विंशत्यधिकायामे सप्तांशं चतुरश्रकम् ॥

अष्टाश्रमष्टभागेन नवांशेनैव वृत्तकम् ।

वर्द्धमानमिदं लिङ्गं शिवाधिकमतः परम् ॥

1570 आयामं दशधा कृत्वा चतुरश्रं त्रिभागतः ।

अष्टाश्रं च त्रिभागेन चतुरंशेन वृत्तकम् ॥

शिवाधिकमिदं कास्तं भुक्तिमुक्तिफलप्रदम् ।

स्वस्तिकलिङ्गलक्षणम् कामिके –

नवधा लिङ्गमानेन त्रिचतुर्द्विरजादयः ।

स्वस्तिकं लिङ्गमाख्यातं अन्यथा च निगद्यते ॥

त्रिंशत् भागे शिवायामे नवरुद्रांशिभागतः ।

ब्रह्माद्यास्त्वथवा तेभ्यो भागभागाधिकक्रमात् ॥

त्रयस्त्रिंशत्कृते लिङ्गे स्वस्तिकं त्रयोदशकम् ।

सार्वदेशिकलिङ्गलक्षणं यथा कामिके –

सार्वदेशिकलिङ्गानि कथ्यन्ते गर्भमानतः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रासादगर्भमाने तु पञ्चांशो त्रिभिरुन्नतम् ।
नवांशो पञ्चभिर्मध्यं भवत्यर्द्धेन कन्यसम् ॥
तद्वान्तरभेदेन भवन्त्यन्यानि बहुपुनः ।
तत्तन्मन्दिरमानेन त्रयस्त्रिंशत्प्रमाणवत् ॥
विंशत्यंशो कृते गर्भे दशांशमधमं भवेत् ।
एकादशांशो मध्यं स्यात् भागैर्वा दशभिर्वरम् ॥
मध्यमे वर्द्धिभागेन नवलिङ्गोदयस्तु वा ।
गर्भन्तु नवधा कृत्वा नवलिङ्गोच्छ्रयस्तु वा ॥
अधमं गर्भपादे वा त्रिपादं चाधमे भवेत् ।
मध्यमेष्टविभागे तु तत्तदन्तरभेदतः ॥
157b त्रयस्त्रिंशत्प्रमाणानि लिङ्गानि कथितानि च ।
अथवा गर्भगेहस्य त्र्यंशैकमधमं भवेत् ॥
गर्भार्धं मध्यमं ज्ञेयं पञ्चत्रिंशं वरं मतम् ।
पूर्ववत् मध्यमं कृत्वा त्रयस्त्रिंशात् भवन्ति हि ॥
एकहस्तं समारभ्य चैकांशेनैव वर्द्धनात् ।
नवहस्तप्रमाणान्तं मानं स्याल्लिङ्गदैर्घ्यके ॥
एकविंशतिभागेन गर्भगेहे विभाजिते ।
त्रयोदशांशकं श्रेष्ठं दशांशमधमं भवेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्रे स्थण्डिल संयुक्ते स्वर्णवस्त्रसमन्विते ।
सकूर्चे सापिधाने च सकूर्चे पल्लवान्विते ॥
तथाविधायां वर्धन्यां माम्बिकां स्थापयेत् गुरुः ।
संपूज्य गन्धपुष्पाद्यैः स्वनुगुप्तां निधापयेत् ॥
ततः पाशुपतास्त्रेण प्रतिभागं सहस्रकम् ।
हुत्वा शान्त्यम्भसा प्रोक्ष्य कुम्भौ स्पृष्ट्वा जपेद्गुरुः ॥
विलोमाद्वर्धन्ते तां दत्वा विसृजेत्तत्त्वतत्त्वपान् ।
तदन्ते मूर्तिमूर्तीशान् लिङ्गपिण्डादि संश्रितान् ॥
क्रियाशक्त्यपि मन्त्राश्च लिङ्गभागत्रये स्थितान् ।

कालोत्तरे

सर्वपीठशिलायाश्च द्वाराद्यं कृत्तिकासु तु ।
प्रासादे चूलिके तद्वत् कर्त्तव्यं हि विसर्जनम् ॥
प्रणवेनैव सर्वेषां संहारं कारयेत्सुता । इति

सुप्रभेदे

तद्दुकूलेन संमिश्र गोवालकृतरज्जुना ।
कर्त्तव्यं यानि स्वपञ्च वृषभं लक्षणान्वितम् ॥
करुणं पवन्तञ्चा भूषयेत् भूषणादिके ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वीरतन्त्रे

वृषगायत्रिमन्त्रेण अर्च्चयेद्वृषभं ततः ।

सुप्रभेदे

रज्जुना बन्ध्य तल्लिङ्गं ककुदाग्रे वृषस्य तु ।
तद्रज्जुना समुद्धृत्य बहुरूपमनुस्मरन् ॥
तल्लिङ्गमुद्धरेन्मन्त्री वृषभेण शिवेन च ।

कारणे

उद्धारयेत्ततो लिङ्गं गजेन वृषभेण वा ।
मौञ्जीरज्जुं समादाय त्रिवृतं बन्धयेद्दृढम् ॥
गजेनोद्धारणञ्चेत्तु रज्वा गोचर्म कृतया ।

कामिके

सुवर्णान्तरया रज्वा वृषभेण प्रचालयेत् ।
शिवमस्तु गृणन् लोके प्रक्षिपेत्तज्जले गुरुः ॥

कारणे

पिण्डिकां खातयेत्तत्र कुन्दाल्याद्यमजेन तु ।
पादकौल्लादि कौल्लान्तं जीर्णञ्चेल्लक्षणान्वितम् ॥
सन्त्यज्य स्थापनोक्तेन लिङ्गं वै स्थापयेन्नवम् ।
जीर्णलिङ्गं समुद्धृत्य शिबिकायां रथेपि वा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्ववत् मत्स्यमं कृत्वा त्रयस्त्रिंशत्प्रमाणकम् ।
लिङ्गायामे विकारांशो चतुर्द्विकरसैर्हितः ॥
सत्रिभागजरैर्लिङ्गविस्तारः परिकीर्त्तितः ।
गायत्र्यंशो तु लिङ्गोच्चैः पञ्चांशैर्वा तु विस्तरः ॥
अथवाष्टदशांशोत्तु लिङ्गोच्चे पञ्चभागकम् ।
चतुर्द्धांशो थवा लिङ्गविस्तारः परिकीर्त्तितः ॥
दैर्घ्यं त्रिसप्तधाकृत्वा रस भूताब्धि भागतः ।
विस्तारः कथितश्चास्य लिङ्गानां मुनिपुङ्गवाः ॥
द्वारस्तम्भादिभिश्चैव मानं लिङ्गस्य मृग्यताम् ।
भागेनवाथलिङ्गानि विभजेत्तानिजाङ्गुलैः ॥
आयादिशुभासिद्ध्यर्थं मंशो वा विभजेद्यथा ।
षोडशांशं समारभ्य चतुर्विंशाति संयुतम् ॥
158 a शतांशं विभजेत्तत्र चैकांशं योजयेद्गुरुः ।
त्रैराशिकलिङ्गलक्षणम् ।
यथा कामिके
अर्द्धनं नवधाकृत्वा ब्रह्मद्याः स्त्रि त्रिभागतः ।
षट्सप्ताष्टक भोगैस्तु नागो रुद्रादिषु क्रमात् ॥
त्रैराशिकमिदं लिङ्गं शुद्धाणां तत्प्रकाश्यते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सहस्रादि लिङ्गलक्षणं शैवालयनिर्माणदीपिकायां
प्रदर्शितमस्माभिः । तत्रैवोह्यं । धारालिङ्गमुख-
लिङ्गलक्षणं यथा सुप्रभेदे

धारालिङ्गं मुखलिङ्गं शृणु वत्स समाहितः ।
पञ्चधारा सप्तधारा नवधारा द्वादशधारकाः ॥
धाराषोडश विंशच्च त्रिरष्टौ चाष्टविंशतिः ।
अष्टाश्रिमूर्ध्निपर्यायं नवांशं वा यथोन्नतम् ॥
पूजाभागं द्विधा कृत्वा ह्यूर्ध्वभागे मुखं भवेत् ।
पञ्चमूर्ध्नि चतुर्वक्त्रं ग्रीवञ्चैक समायुतम् ॥
श्रोत्राक्षौ द्वादशाक्षिञ्च सर्वलक्षणसंयुतम् ।
लिङ्गाकारमधस्तस्य पिण्डिकालक्षणं शृणु ॥

कारणे तु

धारालिङ्गमहं वक्ष्ये श्रूयतां तात प्रजापते ।
पादादिमूर्ध्निपर्यन्तं धारालिङ्गं प्रशस्तकम् ॥
अधोवेदाश्रकं कुर्यात् तदूर्ध्वे त्वष्टधारया ।
एतद्धि हि महाप्राज्ञ सर्वकामप्रसाधकम् ॥
158 b ऊर्ध्वे षोडशधाराश्चेत् भोगार्थी लभते सुखम् ।
एवं क्रमेण संयुक्तं धारालिङ्गमिति स्मृतम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिरसो वर्त्तनं कुर्यात्तच्छत्रु विधिमुच्यते ।
चक्राकारन्तु विप्राणां नृपाणां कुक्कुटाण्डवत् ॥
वैश्यानाञ्चैव खण्डेन्दु शूद्राणां त्रिपुषाकृतिः ।
कृत्वा लिङ्गशिरस्तारं षट्भागेन समं बुधः ॥
सार्द्धेनैव द्विभागेन वर्त्तितं त्रिपुषाकृतिः ।
विस्तारन्तु त्रिधाकृत्वा त्रिभागेन तु वर्त्तितम् ॥
अर्द्धचन्द्रमिति प्रोक्तं सर्वकामफलप्रदम् ।
कुक्कुटाण्डं भवेत्तत्र विस्तारार्द्धेन वर्त्तितम् ॥
अथवा विभजेत्तारमष्टार्द्धेन तु वर्त्तितम् ।
छत्रशीर्षकमित्युक्तं सर्ववर्णेषु योग्यकम् ॥
मानहीने महाव्याधिरधिके शत्रुवर्द्धनम् ।
नाहहीने तु दारिद्र्यं शिरोहीने धनक्षयम् ॥
मूलहीने विनाशस्यात् सूत्रहीने कुलक्षयम् ।
तस्मात्सर्वप्रयत्नेन कारयेल्लक्षणान्वितम् ॥
मुखलिङ्गं ततो वक्ष्ये सर्वकामार्थसाधनम् ।
पूजाभागं समस्तन्तु षड्भागं विभजेत् क्रमात् ॥
त्र्येकांशं स्तनसूत्रमवाधिं कारयेत्ततः ।
चतुराननं चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

159a चतुर्दिक्षु चतुर्वक्त्रं त्रिवक्त्रं पृष्ठहीनकम् ।
कुर्वेक वक्त्रमूर्ध्वे तु मुखमो.. न बुद्धिमान् ॥
मकुटेनोर्ध्ववक्त्रन्तु त्रयोदशार्द्धाङ्गुलेन तु ।
ग्रीवामूलात्स्तनान्तस्तु स्याद्दशाधिक त्रयोदशाम् ॥
स्तनसूत्रावधिर्यावत् कारयेद्विभुजान्वितम् ।
प्रतिमालक्षणोक्तेन मार्गेणैव समाचरेत् ॥
कोशं लिङ्गवदाकारं कारयेल्लक्षणान्वितम् ।
वक्त्रलिङ्गप्रमाणन्तु प्रोक्तं पीठमथ ..णु ॥
स्त्रीशिलां संपरिग्राह्य पीठं कुर्याद्विशेषतः ।
लिङ्गविस्तारमानेन त्रिगुणं पीठविस्तृतम् ॥
कर्णस्य त्रिगुणार्द्धं वा लिङ्गदैर्घ्यसमन्तु वा ।
गर्भगेहं त्रिधा भज्य भागैकं पीठविस्तृतम् ॥
लिङ्गमानेन हर्म्यं स्यात् लिङ्गमानेन पिण्डिका ।
पूर्वाकृतिर्यथा पिण्डि तथा कुर्यात् पुनः पुनः ॥
अन्याकृतिर्न कर्तव्या कर्तृनाशिनी ।
इत्यादि बहुवक्तव्यमस्ति । विस्तर
भयान्न लिख्यते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं लिङ्गलक्षणमुक्त्वा सामान्येन
लिङ्गजीर्णोद्धारमाह –

जीर्णाद्यानि तु षोडशागमवचः प्रोक्तानि लिङ्गान्यपि
1596 त्याज्यान्यङ्गात् तानि सिन्धुरनदीस्रोतोऽग्निपूर्णान्तकैः ।
कोपावेशवशोद्धृतानि तु पुनर्यद्यत् प्रमाणैः स्फुटं
तान्येवाथ यजेद्धवलाश्ममयं लिङ्गं गुरुः स्थापयेत् ॥

आगमवचः प्रोक्तानि कामिकाद्यागमवचन प्रति-
पादितानि जीर्णाद्यानि कालवशात् प्रासादपूजाति
वैकल्येन जीर्णलिङ्गमाद्यं येषां तानि षोडश
लिङ्गान्यपि त्याज्यानि लिङ्गोद्धारविधिना त्यक्त-
व्यानि । तथा चोक्तं कामिके

जीर्णं दग्धं कृशं स्थूलं हीनं मानाधिकं तथा ।
भग्नं च स्फुटितं लिङ्गं अधमं यच्च दृश्यते ॥
लक्ष्मोभ्रिलं वक्रहस्तं संपुटस्फुटितं तथा ।
आभिचारकगर्भाढ्यं व्यङ्गाङ्गं चेति कीर्तितम् ॥
त्याज्यानि सर्वजातानि लिङ्गान्येतानि षोडश ।

सुप्रभेदे
लिङ्गं तु स्फुटितं भिन्नं जीर्णं छिन्नं तथैव च ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ईदृग्विधं ततस्त्यक्त्वा स्थापयेत्तु नवीकृतम् ॥

मोहशूरोत्तरे

हीनजीर्णं कृशं वक्रं स्थूलं मानाधिकं हरे ।

लक्ष्मशून्यं च गर्भाढ्यं संपुटं स्फुटितं तथा ॥

भग्नं च सशीतं भ्रष्टं तथा वज्रहतं हरे ।

एवमादीनि चान्यानि लिङ्गानि परिवर्जयेत् ॥

कालोत्तरे

160a शैवपैस्सेवितं लिङ्गं बहुकालप्रपूजितम् ।

विधिहीनन्तु दुर्द्धार्यं सगर्भञ्च विकोषतः ॥

ईषत्यङ्गं तथानद्धं मानहीनं समुद्धरेत् । इति

अत्र लिङ्गोद्धार क्रम उच्यते ।

सुप्रभेदे

उद्धरेज्जीर्णलिङ्गन्तु तस्योद्धारक्रमं शृणु ।

मण्डलं वर्द्धयेद्धीमाञ्छिवलिङ्गस्य दक्षिणे ॥

सङ्कल्पासनमाराध्यावाह्य पूजां समारभेत् ।

मन्त्रपूतं हविर्द्द्यात् तदग्रेग्नायतने कृते ॥

दूर्वामधुघृतैर्वापि क्षीरेणातिलतण्डुलैः ।

दशात्मना शिवाङ्गैश्च पञ्चब्रह्मषडङ्गकैः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रत्येकं शतमर्द्धं वा होमयेत्पञ्चविंशतिः ।
लिङ्गसञ्चालनार्थाय मूलेनैव शताहुतिः ॥
दद्यात्पूर्णाहुतिं तत्र सहस्राक्षरमन्त्रतः ।

कामिके

समिदाज्यतिलोपेतं हविषा च समन्वितम् ।
वास्त्वन्तर्दिक् बलिं कृत्वा समाचम्य गुरूत्तमः ॥
लिङ्गमभ्यर्च्य सन्तर्प्य त्रितत्त्वादिसमन्वितम् ।
भागे भागे स्वमन्त्रेणाहुतीनां सहस्रकम् ॥

कामिके

लिङ्गस्य चलनार्द्धाय समाचम्य गुरूत्तमः ।
स्नाककोकरणं कृत्वा भोजयेच्छिवलिङ्गिनः ॥
तृप्तिं कृत्वा सहायेन प्रविशेदालयं प्रति ।
ततो विज्ञापयेद्देवं प्रभो देवा बहून्वदम् ॥
अस्योद्धारे कृते शान्ति र्भवतीति भवद्वचः ।
160b तस्मादत्र विधानेन माध्यतिष्ठ महेश्वर ॥
सर्वकर्म विलोत्वेशां शान्तिहोमं समाचरेत् ।
क्षीराज्यमधु दूर्वापि हविनाष्टसहस्रकम् ॥
हुत्वा तदान्तिकं मन्त्री हृदास्नात्वा प्रपूजयेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कामिके

व्यापके ऽस्त्रषडन्तु चतुर्थ्यन्तं प्रयोजयेत् ।
प्रणवादिनमोन्तान्तु मूलमन्त्रोऽयमीरितम् ॥
व्यापके ऽस्त्रषडङ्ग हृदयादिवदन्ततः ।
चतुर्थ्यन्तं प्रयोक्तव्यं प्रणवादिसमन्वितम् ॥
नमस्कारान्तसंयुक्तं हृदयाद्यङ्गपञ्चकम् ।
निर्बीजं योजयेत्तैस्तु लिङ्गञ्चप्रणवासने ॥

कालोत्तरे

कुम्भभागानि संस्पृश्या स्वमन्त्रान्नयेत्ततः ।
सहस्रार्द्धं तदर्द्धं वा ज्ञातव्यं कृत्तिकासुत ॥
ब्रह्मभागे यथाकर्म विष्णौ रुद्रे तथाहितम् ।
तथा चण्डेश्वरं देवं व्यक्ताव्यक्तं नियामकम् ॥
ततस्तुत्वा निमित्तसत्वं श्रावयेदस्त्रमुच्चरन् ।
सत्वः कोपि भयः कश्चि ल्लिङ्गमाश्रित्य तिष्ठति ॥
लिङ्गं त्यक्त्वा शिवाज्ञातो यथेष्टं तत्रगच्छतु ।
विद्याविद्येश्वरैर्युक्तं ज्ञां भुरत्र भविष्यति ॥
तानमुक्त्वा महास्त्रेण कृत्वा र्घ्यन्तु पराङ्मुखम् ।
161a तस्माद्देवं समावाह्य कुम्भे संस्थापयेद्गुरुः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

109

आरोपयन्नृत्त वाद्यैश्च सर्वालङ्कारसंयुतम्।
ततो भक्तजनैस्सार्द्धं स्तोत्रमङ्गलवाचकैः॥
समुद्रान्ते शिवेच्छैलं निक्षिपेद्धबाजले।
निक्षिपेन्मृण्मयन्तोये शिवेऽग्नौ तु दारुजम्॥

कामिके

प्रत्यहं चार्चनं कालं शान्तिहोमसमन्वितम्।
भूयः पुष्पध्रुवं हुत्वा दिक्पतीनां प्रकल्पयेत्॥
162 a प्रासादवास्तु शुद्ध्यर्थं होतव्यञ्चाशताशतम्।
महापाशुपतास्त्रेण प्रासादे तत्र रक्षयेत्।

मोहशूरोत्तरे

महापाशुपतं स्वामि रक्षणाय निवेशयेत्।
पापादेवाः परे लिङ्गं स्थापये द्विधिना बुधः॥
पूर्वमानान्वितं लिङ्गं तद्रूपं संस्कृतन्तथा।
तस्थाने तन्निवेश्याथ विधिना पूजयेत् सदा॥

सुप्रभेदे

जीर्णोद्धारं कृतं सर्वं मण्डलस्थापकाम्भवे
विज्ञापयेत्प्रणम्यादौ शिवमस्त्विति चोच्चरेत्।
शिवं प्रागवत् समभ्यर्च्य शिवास्त्रेतु विसर्जयेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्य च्छिद्रापनोदार्थं मघोरास्त्रेण मन्त्रवित् ।
आज्येनाष्टशतं हुत्वा व्याहृत्याहुति माचरेत् ॥
अग्निस्थं शिवमुद्वास्य होमशेषं समापयेत् ।
सर्वं त्याज्य लिङ्गान्युक्त्वा जीर्णोद्धारेपि परिग्राह्य
लिङ्गान्याह । अशक्तानीत्यादि । अशक्तैः शिल्पिना-
-चार्येण वा कृतानि निर्मितानि स्थापितानि वा ।
तदुक्तं कामिके
अशक्तस्थापितं लिङ्गं तथा मन्त्रक्रियेतराम् ।
परित्यक्तक्रियायोग माभिन्नस्थापितं भवेदिति ॥
सिन्धुरेत्यादि सिन्धुरो मत्तगजो वनगजो वा
नदीस्रोतो नदीप्रवाहः । रिपवः शत्रवः लुण्टका-
167b दयः । उन्मत्तकाः । पित्तपिशाचग्रस्ताः एतैः
कोपावेशवशेन तत्तन्मदपित्तशास्त्रवादिजनितक्रोधा-
वेशवशेन उद्धृतानि तानि लिङ्गानि अव्रणानि
निर्व्रणादिदोषरहित रहितानि यदि तान्येव स्थापयेत् ।
तथा चोक्तं कामिके
तथैव स्थापनीयानि यद्येतान्यव्रणान्यहीति ।
अथ शत्रु गज नदी पुरादिसृतेषु लिङ्गेषु यल्लिङ्गा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मन्त्रोच्चं द्वादशवत्सरादि कालेनाप्यलक्ष्यं तदपरमन्यं
नूतनं लिङ्गं गुरुराचार्य स्थापयेत् । तदुक्तं

सुप्रभेदे

चलितं पतितं वापि नदीस्रोतेन पातितम् ।
गजेनोद्धापितं वापि चोरैरुन्मत्तकैरपि ॥
तल्लिङ्गं तत्र संस्थाप्य पूर्ववच्छेषमाचरेत् ।
गंभीरजलनदीस्रोते लिङ्गं वा चलितं स्याति ॥
अन्यत्र प्रतिमां वाथ शालदण्डानुयोजयेत् ॥
मूललिङ्गं महद्भयञ्चेन्नवलिङ्गन्तु पूर्ववत् ।

कामिके

रिपूणां सङ्घ हृतं चेल्लिङ्गं वा प्रतिमादिकम् ।
तद्राष्ट्रनाशो नृपतेः शत्रुभिः परिपीड्यते ॥
सर्वयत्नात्तदादद्यात्तत्रैव स्थापनाय च ।
लब्धश्चेल्लिङ्गबेराद्यं गुप्तदेशे निधाय च ॥
5a लिङ्गेन पाददोषस्या शान्त्यर्थं/घोरमन्त्रतः ।
सहस्रं होमयेदाज्य तिलाभ्यां चरुणा शतम् ॥
मधुरत्रयसंयुक्तं सहस्रं दूर्वयाहुतिः ।
कृत्वान्ते स्थापनोक्तयादि स्थापयेत् पूर्वभूतले ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लक्षणोद्धारणाच्चापि मोचनं जलवेशनम् ।
विद्यायान्यत्प्रकर्तव्यं स्थापयेत्तत्त्ववेदिभिः ॥
अलाभे लिङ्गबेराद्यं यद्यन्यत् स्थापयेन्नवम् ।
मासादर्वाक् तदूर्ध्वं चेत् यावन्मासत्रयावधि ॥
प्रत्यहं शान्तिहोमस्स्यात् कर्तव्यं स्थापनान्तकम् ।
तदूर्ध्वं स्थापनं बाललिङ्गाद्यै शास्त्रचोदितम् ॥
तस्मात् सर्वप्रयत्नेन मासत्रितयमध्यमे ।
संस्थाप्य बाललिङ्गाद्यं बालस्थापनवर्त्मना ॥
गृहीतं स्वन्नचोराद्यैः स्वलिङ्गं कौतुकान्तकम् ।
प्रतिमा मुखलिङ्गं वा बाणलिङ्गादिकन्तु वा ॥
प्रत्यहं चैवमन्येद्युः स्थितमन्यत्र चेद्धृतम् ।
तदा युद्धेन जित्वा वा वित्तं दत्वा यथादरात् ॥
आनाय्य लिङ्गबेराद्यं स्वस्थाने स्थापयेद्ध्रुतम् ।
संवत्सरत्रयादूर्ध्वं अलाभेतं मुनीश्वराः ॥
1636 मूलस्थाने यथापूर्वं तद्द्रव्यैस्तत्प्रमाणतम् ।
संस्थाप्य मूललिङ्गाद्यमर्चयेदर्चनोक्तवत् ॥
अज्ञातपूर्वमानं चेदाकृतिर्वा गुरूत्तमैः ।
तत्प्रत्याद्यानुरूपेण यजमानानुरूपतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लिङ्गमापाद्य विधिना स्थापयेदुक्तवर्त्मना ।
बाणलिङ्गं तु वा तत्र स्थापयेत् सर्वसिद्धये ॥
बेरं वा पीठिकं वापि न्यायेनात्मकारयेत् ।
देवीं विहाय देवो वा देवी वा केवला यदा ॥
शम्भुभिस्सङ्गृहीता चेत् स्थितस्यैवानुरूपतः ।
समायाद्येतरं तस्य प्रतिष्ठाञ्च समाचरेत् ॥
कल्याणं कारयेदन्ते विधानाद्देशिकोत्तमः ।
स्थापनान्ते तु बेराद्य मानीतञ्चेत्तदन्यके ॥
देशे संस्थाप्य विधिना पूजयेन्नित्यमादरात् ।
पीठञ्चेत् सन्त्यजेल्लिङ्गे बाथवान्येन कारयेत् ॥

कामिके

मासादिद्वादशाब्दान्तं तदन्तरदिनेष्वथ ।
तस्मादादाय देवेशं मूललिङ्गे नियोजयेत् ॥
मूललिङ्गमलब्धञ्चेत् देशकालानुरोधतः ।
षट्त्रिंशदब्दपर्यन्तं मूललिङ्गं निवेशयेत् ॥
बाललिङ्गप्रतिष्ठोक्त दिनपक्षादि होमकम् ।
द्विगुणं त्रिगुणं तस्य चतुर्विंशति वत्सरे ॥
164a कृतञ्चेद् द्विगुणं होममन्ते देशिकोत्तमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

षट्त्रिंशाद्वत्सरोर्ध्वन्तु मूलस्थानान्तदेवहि ।
सकलेष्वेवमेवस्यात् त्रिकोषः कश्चिदुच्यते ॥
द्वादशाब्दान्तरे वास्य मूलस्थाने निवेशयेत् ।
नोचेन्नात्रैव संस्थाप्यं मूलबेरं त्रिकोषत इति ॥

एवं सामान्येन लिङ्गजीर्णोद्धारमुक्त्वा
स्वायंभुवादि लिङ्गविशेषाणां शान्त्यंशां जीर्णोद्धार
प्रकारञ्चाह -

लिङ्गस्वायम्भुवाख्ये भवति यदि चिरा जीर्णिता तत्रदोषो-
नास्त्येवोक्तात् शान्ति भवति च विमल स्वर्णपट्टादिबन्
शान्त्यंशां विहाय ऋषिगण सुरकृतामेव जीर्णोद्धृतिस्या
पीठेत्वङ्गादिहीने त्रियवमुखपरे मानुषे लिङ्गपीठे ॥

अस्यार्थः स्वायंभुवाख्ये लिङ्गे चिरकालवशेन
जीर्णिता भवति यदि तत्र दोषो नास्त्येव तदुक्तं
सूक्ष्मे

स्वायम्भुवादिलिङ्गेषु जीर्णोद्धारं न कारयेत् ।
अज्ञानान्मोहतो वापि राजराष्ट्रं विनश्यति ॥
अजिते
दग्धन्तु तत् भवेदत्र वर्णमुपलक्ष्यते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

खण्डनं स्फोटनं चैव स्वायंभुवि न दोषदम्।

निर्वाहे-

स्वायम्भुवादिलिङ्गानां जीर्णदोषं न कारयेत्। इति

उक्तआगमोक्तशान्तिस्तु भवति।

164b |सयथा कामिके

स्वयम्भौदैविके बाणे चार्षे तु गाणपे तथा।

च्छिन्ने वा स्फुटिते भिन्ने तत्र शान्तिर्विधीयते॥

दिशाहोमन्ततः कुर्या दृगाद्यध्ययनन्तथा।

अष्टोत्तरशतप्रस्थैः कुर्यात्क्षीराभिषेचनम्॥

शान्तिहोमं पुनः कृत्वा स्नपनं कारयेत्ततः।

ब्राह्मणान्भोजयेत् पश्चाच्छैवान् संभोजयेत्ततः॥

मद्ध्य, ग्रामे वलिन्द ग्रामे वा नगरे पि वा।

मुद्गान्नं पायसं गौडं कदलीफलसंयुतम्॥

स्नपनमेव कर्तव्यं सर्वदोषापनुत्तये।

आचार्यं पूजयेन्नित्यं स्वर्णवस्त्रादिभिस्ततः॥

तदन्ते स्नपनं कुर्यात् प्रभूतन्तु हविर्ददेत्।

सर्वैरङ्गैर्विशीर्णश्चेत् पुनस्संस्थापयेन्नवम्॥

लिङ्गे स्वायम्भुवादौ तु जीर्णादौ शान्तिरीरिता। इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विमल स्वर्णपट्टादि बन्धं च भवति । छिन्न छिन्न
जीर्णादौ विमल स्वर्णपट्टादिबन्धः । दार्ढ्यार्थं बन्धनं च
भवति । आदिशब्देन ताम्रादयो गृह्यन्ते ।

तथा निश्वासे

तल्लिङ्गे स्फुटिते स्फुटिते भग्ने खण्डिते वह्निदूषिते ।
तच्छल्पं तत्प्रदेशे तु योजयेत् पूर्ववत् गुरुः ॥
स्वर्णं वा ताम्रपट्टं वा बन्धयेत्तु दृढीकृतम् ।
तत्पूर्वं स्थापयेल्लिङ्गं संप्रोक्षणमथाचरेत् ।

तथा दीप्ते

165a स्वायम्भुवादिलिङ्गानां स्फोटने चाग्निदग्धके ।
लोहपट्टे नतत् बद्ध्वा पूजयेत् पूर्ववत् बुधः ॥

निश्वासे नित्यप्रायश्चित्ते

स्वायम्भुवादि जीर्णश्चेत् पट्टेनैव दृढीकृतम् ।
अशक्यं पट्टबद्धैस्तु दोषांशं संपरित्यजेत् ॥
कोपमंशं गृहीत्वा तु पूर्ववत् सर्वमाचरेत् ।

एवं स्वायम्भुवे दोषाभावमुक्त्वा दैविकादीनां
शान्त्यांशं विहाय जीर्णोद्धारं कर्तव्य इत्याह
ऋषिगणासुरकृतान्येतु ऋषिगणदेवगणनाथ प्रतिष्ठापितो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आदिशैवेन बाणलिङ्ग बाललिङ्ग पौराणिक
बाललिङ्ग रत्नलिङ्ग बालपीठाख्य भद्रलिङ्गेषु
तत्र लिङ्गे शैलजयोः छिन्न भिन्नादौ सत्यामपि
सोढव्योः विहाय त्यक्त्वा जीर्णोद्धृतिस्या:।
जीर्णोद्धृति: कर्तव्या इत्यर्थ:

कामिके

शैलजस्याविशेषेण यवान्तं लिङ्गमानके।
चतुर्यवान्तमर्चासु मात्रान्तं पीठकल्पने॥
दारुलिङ्गेषु मात्रान्तं बालाग्रं ब्रह्मसूत्रके।
तदर्चनार्थलिङ्गे शैलजं मानमीरितम्॥

तथा स्वायम्भुवे

दैविके तु विशेषेण माषादि द्विकांशकम्।
मानहीनं गृहीतव्यं तदूर्ध्वं न प्रकाश्यते॥
आर्षे तु विशेषेण काङ्गुलादि त्रियङ्गुलम्।
मानहीनं गृहीत्वा तु तदूर्ध्वं न प्रकाश्यते॥

कारणे

गाणपादिषु लिङ्गेषु माषादि दशमाषकम्।
हीनाङ्गं तु गृहीतव्यं तदूर्ध्वं न विचारत:॥ इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं लिङ्गे शान्त्यांशमुक्त्वा तत्पीठेषु शान्त्यांश-
माह - पीठेषु स्वायम्भुवादिपीठेषु अङ्गविहीनेऽपि
अङ्गोपाङ्गप्रत्यङ्गवैकल्ये नास्ति तदुक्तं निर्वासे -
स्वायम्भुवादिपीठेषु भग्ने विस्फोटनेऽपि च ।
अग्निनादूषितं चैव त्यक्त्वा चान्यत् परिग्रहेत् ॥
अत्र किञ्चिद्विशेषोऽस्ति प्रत्यङ्गोपाङ्गमङ्गकम् ।
अङ्गं कर्णोर्ध्वदेशे तु उपाङ्गं कण्ठमेव च ॥
प्रत्यङ्गं चेदधस्ताच्च त्रिविधन्तदुदाहृतम् ।
अङ्गेषु दुष्टलिङ्गं ग्राह्यं तदूर्ध्वमशुभं भवेत् ॥
उपाङ्गयुगाङ्गलिङ्गं ग्राह्यं अपरं वर्जयेद्बुधः ।
प्रत्यङ्गं द्वादशाङ्गुल्यं मावरं वर्जयेन्नवम् ॥
जीर्णशाल्याद्यवन्ध्यं वा तदङ्गं पूर्ववत्कृतम् ।
सर्वाङ्गानां शतं दृष्ट्वा वर्जयेत्तु प्रयत्नतः ॥
तच्छिलान्तात्प्रमाणेन तद्रूपं कारयेन्नवम् ।
पूर्ववत् कारयेत्पीठं तस्माल्लिङ्गं प्रतिष्ठितम् ॥
दीप्ते तु
पीठे स्वायंभुवादीनां स्फोटने छिन्नभिन्नके ।
महाङ्गमङ्गप्रत्यङ्गं पीठास्थे यान्विता भवेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

व्यूतवारिचनावंच पट्टिकाकम्पमेवच ।
166a महाङ्गमिति विख्यातं कण्ठमङ्गं प्रकीर्त्तितम् ॥
वाजिनं कैरवं चैव जगती पादुकन्तथा ।
प्रत्यङ्गमिति विख्यातं विशेषन्त्वधुना शृणु ॥
महाङ्गे रसाङ्गुलं ग्राह्यं मङ्गं तु द्विगुणं भवेत् ।
प्रत्यङ्गे त्रिगुणं ग्राह्यं तत्प्रमाणाधिकन्त्यजेत् ॥
एवं स्वायंभुवादीनां मार्गान्तत्र प्रकल्पयेत् ।

ननु उक्तानैकागमवचनै स्वायम्भुवादि लिङ्गानां जीर्णोद्धारविधिनिषेधश्च दृश्यते । तत्कथमत्र समाधानमिति चेत् सत्यम् स्वायम्भुवादि लिङ्गेषु जीर्णोद्धारनिषेधवचनानां स्वायम्भुवलिङ्गमात्रएव मुख्यार्थत्वं । दैविक गाणपार्ष बाणलिङ्गेषु तन्माहात्म्यपरत्वादुपचरितार्थत्वमेव । अन्यथा तेषां शान्त्यांशवचनानैरर्थक्यं स्यात् । इदानीं मानुषलिङ्गपीठादौ विशेषमाह त्रियवमुखपराङ्लि मानुष्ये मानुष्यप्रतिष्ठापिते लिङ्गपीठे लिङ्गपीठ विषये त्रियवमुखपरे त्र्योयवामुखं आदिर्येषान्ते त्रियवमुखाः । तेभ्यः । परे तेभ्यो धिके भिन्नाभिन्ना

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दास्तिकोष: । जीर्णोद्धृतिस्यादित्यत्रापि संबन्ध: कर्त्तव्य: । लिङ्ग मानुषे त्रियवाधिकं पीठे त्रियङ्गुलाधिकमित्यर्थ: । तथाचोक्तं दीप्तागमे -

6 b मानुषे लिङ्ग जीर्णस्य त्रियवाद्याधिकं त्यजेत् ।
मानुषे पीठजीर्णञ्चेत् पूर्ववत् स्फोटनादिभि: ॥
मध्याङ्ग कृष्णाङ्गुलं ग्राह्यं मङ्गतु द्विगुणीकृतम् ।
अधस्ताद्व्यङ्गुलं ग्राह्यं तदूर्ध्वं परिवर्जयेत् ॥
पूर्वमानेन सङ्ग्राह्य स्थापयेत् पूर्ववद्बुध: ॥ इति

तथांशुमत्तन्त्रेच

एकद्वित्रियवाधिक्ये सहसा त्यज्य देशिक: ।
एकद्वित्र्यङ्गुलाधिक्ये स्फोटने जीर्णकोपिच ॥

मानुषे लिङ्गपिण्डीचे चात्र दोषो नविद्यत इति

मानुषलिङ्गपीठयो स्सर्वाङ्ग जीर्णविषये अन्यतरजीर्णे सत्यन्यतरं परिग्राह्यम् । तथोक्तं

दीप्ततन्त्रे

मानुषेलिङ्ग जीर्णञ्च वर्जयेत्पीठमाहरेत् ।
मानुषेपीठजीर्णेतु वर्जयेत् पीठसङ्ग्रहेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वीरतन्त्रे

लिङ्गं नष्टो बयदि भग्नपीठं
पीठं त्यजेत्पूर्ववदेव कुर्यात् ।
पीठं नष्टो बं यदि भग्न लिङ्गं
आचार्यकौलालापि वर्जनीयम् ॥

निश्वासे

मानुषे लिङ्ग पीठे चे दृग्ये च स्फोटनादिके ।
अर्घ्याङ्कुलस्य यल्लिङ्गं तदूर्ध्वं वर्जयेन्नवम् ॥
पीठे च त्र्यङ्गुले हीनं तत्परं वर्जयेन्नवम् ।
पूर्वाल्लिङ्गपीठं च स्थापयेत् सर्वसिद्धिदम् ॥
विपरीतमनर्द्धाय भवेत् सत्यं न संशयः ।

तथा कारणे च

मानुषादिषु लिङ्गेषु अर्धमाषविहीनकम् ।
ब्रह्मभागे चतुर्माषं विष्णुभागे त्रिमाषकम् ॥
सर्वहीनं तु गृह्णीयात् तदूर्ध्वं न प्रशस्यते ।
मानुषादिषु लिङ्गेषु पीठे ष्वेवमथाचरेत् ॥
दृष्ट्वा पीठस्थं लिङ्गं कृत्वा पीठं पुरोन्नवत् ।
यथा लिङ्गं तथा पीठे योजयेत्तु विचक्षणः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दृष्ट्वा लिङ्गस्य पीठं तत्क्रमेणैव बुद्धिमान् । इति

अथ ऋषिगणासुरकृताख्य इत्यत्राख्य कालदोक्त बाण

लिङ्गादीनां पञ्चानामपि मानतन्त्रागमवचनैरेव क्रिया

कल्पः प्रदर्श्यते तत्र बाणलिङ्गस्य यथा -

दीप्ते -

बाणलिङ्गस्य जीर्णे तु भावाधिक्यं परित्यजेत् ।

बाणलिङ्गस्य पीठे तु मानुषे त्वथाधिकल्पयेत् ॥

लिङ्गं सङ्ग्राह्य मतिमान् लोहपीठे प्रतिष्ठितम् ।

विधिना बन्धनं कृत्वा पूजयेच्छिवमादरात् ॥

सूक्ष्मे

बाणलिङ्गस्य जीर्णे तु खण्डनादधिकं यथा ।

उद्धारक्रममार्गेण समुद्रे निक्षिपेद्बुधः ॥

अन्यद्वा बाणलिङ्गं वा स्थापयेद्विधिना बुधः ।

कामिके

जीर्णादि दोषं दृष्ट्वा च विधिनापि न चालयेत् ।

सुदृढं स्वर्णपट्टाद्यैः कृत्वा शान्तिं समाचरेत् ॥ इति

बाललिङ्गस्य यथा सुप्रभेदे -

दारुणालयहीनं चेत् कृत्वा तत्पूर्ववद्बुधः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

P.123

बाललिङ्गं च पीठं वा छिन्नभिन्नादिसंश्रिते ।
तल्लिङ्गन्तु जले त्यक्त्वा लिङ्गं संपाद्य पूर्ववत् ॥

कारणे

जीर्णिते बाललिङ्गे तु उद्धारणमथाचरेत् ।
तस्याग्रे स्थण्डिलं कृत्वा निर्दोषैः सकलैः सितैः ॥
अग्न्याधानादिकं सर्वं पूर्वोक्तविधिना नयेत् ।
स्वामि अस्त्रमन्त्रेण घृतमोक्षानमन्त्रतः ॥
हृदयेन चरुं कृत्वा शाबामोक्षोतिलाजकम् ।
सिताब्जं नेत्रमन्त्रेण बिल्वपत्रन्तु वर्मणा ॥
अष्टोत्तरशतं हुत्वा प्रत्येकन्तु विशेषतः ।
द्रव्यान्ते व्याहृतिं हुत्वा जयादिं जुहुयात्ततः ॥
पूर्णाहुतिं ततः कृत्वा शिरोमन्त्रेण देशिकः ।
नवलिङ्गं प्रकुर्वीत पूर्वोक्तेनैव वर्त्मना ॥ इति

पौराणिकस्य लिङ्गस्य यथा सूक्ष्मे –

पौराणिकस्य लिङ्गस्य चरमानक्षयोयादि ।
संप्रोक्षणं ततः कृत्वा चत्वारो द्दृष्टेन कर्मणा ॥
येनकेन प्रकारेण निर्दिष्टेन निश्चितम् ।
शतत् पौराणिकं लिङ्गं पारंपर्येण नामकृत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्यलिङ्गस्य जीर्णेतु खण्डस्फोटादिके सति ।
तस्यैवस्फुरतस्सम्यक् मिश्रलिङ्गप्रति ष्ठयेत् ॥
168a यवान्तरप्रमाणेन हीनञ्चापिनदोषभाक् ।
तस्माद्दाधिकहीनञ्चेत् स्वर्णेन राजतेनवा ॥
ताम्रपट्टेनवा कुर्यात् अङ्गसंपूरणं बुधः ।
पुनस्थापन मार्गेण कारयेद्विधिपूर्वकम् ॥
साकद्रव्य कृतं लिङ्गं पुराणं तं नविद्यते ।
अष्टादशपुराणेतु लिङ्गपौराणमार्गतः ॥
मूलशास्त्रविधानेन कुर्यात् पौराणिके विधौ ।
बाललिङ्गस्य यथा सुप्रभेदे
बलिभ्रमणकालेतु लिङ्गपातितमेव चेत् ।
स्फुटितं चलितं भग्नं छिन्नं भिन्नन्तु सम्भवेत् ॥
तत्रैवकारये द्धोम मथवालय मध्यमे ।
पूर्ववत्बाललिङ्गन्तु कृत्वा तत्रप्रदक्षिणम् ॥
अथवा पूर्ववत् कृत्वा भ्रमणान्ते हुतं क्रमात् ।
मूलमन्त्रं जपेत्तत्र शतमष्टोत्तरं बुधः ॥
अशक्यमातिगम्यं वा मूलमन्त्रं शतं जपेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रत्नलिङ्गस्य यथा अजिते

रत्नजेष्वेव लिङ्गेषु खण्डादौ समुपस्थिते ।

तदेवान्येन माने तु तद्रत्नेन शिल्पिना ॥

कारयेल्लोहजे लिङ्गे खण्डस्फोटादि संभवे ।

तन्मानेनापरं लिङ्गं तेन द्रव्येण कारयेत् ॥

अनयोरत्र कुर्वीत होमं ब्राह्मण भोजनम् । इति

भद्रलिङ्गस्य यथा सुप्रभेदे

बलिपीठं विना यत्तु स्थापयेत् बलिपीठकम् ।

निश्वासे

बलिपीठस्य भेदे तु त्यक्त्वा चान्यत् परिग्रहेत् ।

पीठस्य फलके जीर्णे तत्प्रदेशं समुद्धरेत् ॥

पुनस्सन्धानकं कृत्वा पूर्ववत् स्थापयेत् बुधः ।

स्वायम्भुवे

पीठाग्रं वाथ बाह्यं वा मल्लमानमथाचरेत् ।

यथेष्टदेशे कर्तव्यं मानोत्कृष्टमथाचरेत् ॥

बाह्यपीठं समादायाचान्तः कार्यं न कारयेत् ।

न्यूनमानं न कर्तव्यं मार्थकं कुम्भदं भवेत् ॥

तस्मात् सर्वप्रयत्नेन अन्तर्ग्राह्यं न कारयेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यदि मोहेन कुरुते कर्त्ता तत्र विनश्यति

सूक्ष्मे

जीर्णपीठपरित्यागं कृत्वा प्रस्थापयेन्नवम्।
तज्जीर्णन्तु त्रिधा प्रोक्तं स्फुटितं छिन्नभिन्नकम्॥
मद्ध्यपीठं विशेषेण महाङ्गोपाङ्गसंयुतम्।
उपानं जातिर्नाल कुमुदं कम्बुपट्टिका॥
पद्मञ्च कर्णिका चाथ महाङ्गमिति कीर्तितम्।
दण्डोपदण्डनास्यादि उपाङ्गमिति कीर्तितम्॥
वर्जयेत्तन्महाङ्गेषु नाल्पाल्पच्छेदे प्रभञ्जनम्।
क्षुद्रपीठादि सर्वेषु विभिन्नेतांश्चैव वर्जयेत्॥
तस्योद्धारक्रमं वक्ष्ये पीठदक्षिणमण्डले।
सङ्कल्प्यानमावाह्य पूजामात्र समाचरेत्॥
तत्पूर्वे स्थण्डिलं कृत्वा शालिभिर्मण्डलैश्शुभैः।
तन्मद्ध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम्॥
169 a द्रोणाम्बुपूरितघटं तन्मद्ध्ये विन्यसेद्बुधः।
आवाह्य पीठाद्देवांश्च कुम्भमद्ध्ये तु विन्यसेत्॥
निवेद्यादीन् समाप्याथ चाग्निकार्यं क्रमागतः।
आधानादि विवाहान्तं कृत्वा मध्वभूतैरपि॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दूर्वाभिस्तण्डुलैस्तत्तद्दैवता मन्त्रमुच्चरन् /
शतमर्द्धं तदर्द्धं वा होमयेत्तु पृथक् पृथक् ॥
क्षुरिकाबीजमुख्येन पूर्णाहुतिमथाचरेत् ।
जयादिरभ्यधानञ्च क्रमाद्राष्ट्रभृतं हुनेत् ॥
अग्निस्थं मण्डलस्थं च कुम्भमध्ये समावहेत् ।
भूतले निखनेत्तानि समुद्रेष्वथवा नयेत् ॥
जीर्णपीठादि संभूत मालिन्यादिदमाचरेत् ।
पीठशुद्धिं ततः कृत्वा पञ्चामृत गव्य बिल्वकैः ॥
भद्रपीठे विशेषोऽस्ति तदग्रास्थित दर्पणे ।
धाराभिषेचनं कुर्यात् शुद्धैस्स्वद्धिति मन्त्रतः ॥
वास्तुहोमबलिञ्चाथ मण्डपाद्यां समाचरेत् ।
रक्षाबन्धनन्ततः कुर्यात् भद्रपीठे तु कार्णिके ॥
अन्येषामपि पीठानामथवा तद्विनाचरेत् ।

कामिके ध्वजदण्डजीर्णोद्धारः

दृढकाष्ठावसानान्ते ध्वजावस्थानमेव वा ।
जीर्णादिदोषदं त्यक्त्वा ध्वजमन्यान्निवेशयेत् ॥ इति
॥ जीर्णोद्धारे द्वितीयपरिच्छेदः ॥
॥ ब्रह्मविद्यायै नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

96 ।अथैवं लिङ्गजीर्णोद्धारप्रकारमुक्त्वा प्रतिमा जीर्णोद्धारमाह ।

शैलं लोहजमृज्जदारुजमिति ख्यातञ्च चित्रादिकं -
बेरं जीर्णं विभिन्न द्रव्य मुदितं दोषावहं पूजने ।
अङ्गादिष्वपि दुष्टता यदि भवेत् द्रव्यतन्मानत-
स्तच्छ्रेष्ठेन तु वागमोक्त विधिना कुर्याच्छुभे प्राप्तये ॥

बेरं प्रतिमा । अत्र प्रतिमाशब्देन सुखासनादि शिवप्रतिमाभेदा गौरीप्रतिमाभेदा शूलप्रतिमादयोऽपि गृह्यन्ते । तच्चबेरं शैलादि भेदेन बहुविधमित्याह । शैलं शिलामयं लोहजं स्वर्णादिनिर्मितं मृज्जं मृत्तिका संपादितं दारुजं लिङ्गार्थं पूर्वोक्त वृक्षादि साधित मितिख्यातम प्रसिद्धम । चित्रादिकं च । अत्र आदिशब्देन आभासेष्टकादि रत्नादिकं सिद्धान्त कोशाच्च एवं गृह्यन्ते । तज्जीर्णं विभिन्नद्रव्यं वा भवति चेत् पूजनो दोषानावहति करोतीति । दोषावहमुदितं तथाचोक्तं सूक्ष्मे -

मृण्मयं दारुजं वापि लोहजं वा शिलामयम् ।
स्थापितपूजितं बेरं जीर्णं वा भिन्नमेव वा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

छिन्नं वाऽप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत्।
पूजयेद्यदि मोहेन राजराष्ट्रं विनश्यति ॥

1700/ अङ्गादिषु अङ्गोपाङ्गप्रत्यङ्गेषु दुष्टता। जीर्णादिदोष
युक्तता भवेदिति द्रव्यतन्मानतः यद्द्रव्येण पूर्वबेरं
तद्द्रव्येण यन्मानेन पूर्वबेरं तन्मानेन च तच्छ्रेष्ठे-
न वा पूर्वद्रव्यापेक्षया उत्तमद्रव्येण वा तथा चोक्तं

दीप्ते

शिलाबेरस्य जीर्णे तु अङ्गोपाङ्गे विसर्जयेत्।
प्रत्यङ्गे जीर्णिते कुर्यात् ग्राहयेत्तत्प्रयत्नतः ॥

निश्वासे

बेरादीनाञ्च सर्वेषां मङ्गोपाङ्गं त्रिधा स्मृतम्।
अङ्गेषु जीर्णितं वर्ज्यमुभये स्वगृहे ततः ॥
अङ्गोपाङ्गप्रत्यङ्गानां स्वरूपं कारणे प्रतिपादितम् ।

तद्यथा

अङ्गं प्रत्यङ्गं साङ्गं च मुपाङ्गञ्च चतुर्विधम् ।
शिरोवक्त्रञ्च हृदयं मङ्गं चेति प्रकीर्तितम् ॥
वक्षः कण्ठस्तनौ बाहू नाभिगुह्योदरन्तथा ।
ऊरुजानुद्वयञ्चैव प्रत्यङ्गमिति कीर्तितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नेत्रनासाग्रकण्ठञ्च पाणिपादतलाङ्गुलिः ।

जटामकुटसंयुक्तं स्याङ्गं चेति प्रकीर्त्तितम् ॥

वस्त्रोपवीतमाला च आयुधाभरणान्तथा ।

गङ्गाचन्द्रं च भस्मारं नागकुम्भौ तथैव च ॥

प्रभाहीनसमायुक्तं पत्मबन्धन्तथैव च ।

आसनाभरणंचैव उपाङ्गमेवं प्रकीर्त्तितम् ॥

दीप्ते

170b मृत्काप्रतिबिम्बानां मङ्गोपाङ्गं विधीयते ।

मूर्द्धादिपादपर्यन्तं मङ्गमेतत्प्रकीर्त्तितम् ॥

उपाङ्गं प्रकोष्ठबाहुञ्चाङ्गुल्यं कण्ठ उच्यते ।

भूषणञ्चोपवीतञ्च वस्त्रं शास्त्रादि रुच्यते ॥

प्रत्यङ्गमिति सर्वेषां छिन्ने भिन्ने च संभवे ।

पूर्वलक्षणयन्मात्रं तन्मात्रं योजयेत्ततः ॥

रहस्यार्थः कथ्यते कश्चित्पुनस्सन्धानमाचरेत् ।

पञ्चगव्येन संप्रोक्ष्य जलेनस्नानमाचरेत् ॥

बेरशुद्धिं ततः कुर्यात् प्रतिष्ठाविधिपूर्वकम् ।

सर्वलोकस्य शान्त्यर्थं शान्तिकर्म समाचरेत् ॥

प्रत्यङ्गस्य विधिप्रोक्त उपाङ्गस्य ततश्शृणु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यथासमस्तजीर्णन्तु पूर्वमात्रं सुयोजयेत्।
पुण्याहं वाचयेत्तत्र प्रतिष्ठा विधिपूर्वकम्॥
दधिस्नानं ततः कुर्याच्छान्तिकुम्भं समाचरेत्।
उपाङ्ग विधिवत्प्रोक्त मङ्गहीनन्तु ततः शृणु॥
खण्डनं भेदनं वापि स्फुटितं जीर्णसंभवम्।
जीर्णबेरं समुद्धृत्य वस्त्रेणाच्छादयेद्बुधः॥
पूर्वलक्षणसङ्ग्राह्यं विधिवाच्छिल्पिभिस्सह।
पूर्ववल्लक्षणं ग्राह्यं हीनाधिकं च वर्जयेत्॥
सर्वावयवसंपूर्णं दर्पणप्रतिबिम्बवत्।
अङ्गोपाङ्गप्रत्यङ्गं तद्वद्वै कल्पयेन्नवम्॥
पुण्याहं वाचयेद्धीमान् कुर्याच्छिल्पिविसर्जनम्।
171a पञ्चगव्येन संप्रोक्ष्य जलाधिवासनं परम्॥
प्रतिष्ठां विधिवत्कुर्यात् त्रिवारं शान्तिहोमकम्।
वातुले
अग्न्यादिदग्धे ह्रिम्बं तत्बिम्बे दूषिते सति।
नृपस्य मरणं शीघ्र मुग्ररोगेण संभवेत्॥
नवमन्यत्परिग्राह्यं पूर्वोक्तैर्लक्षणान्वितम्।
संप्रोक्षणं ततः कृत्वा शान्तिहोमन्तु कारयेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्निनास्फुटिते छिन्ने प्रत्यङ्गोपाङ्गहीनके ।
माषं माषद्वयं चैव तथा माषत्रयं तथा ॥
यद्दङ्गं दृष्टवत्कृत्वा पूजाकार्यन्नदोषभाक् ।
सद्यश्शान्तिकुम्भन्तु कृष्णालेपनमाचरेत् ॥
अथवा लोहजे बिम्बे पूर्ववत् परिकल्पयेत् ।
लोहजानान्तु बिम्बानां विशेषः कश्चिदस्ति हि ॥
कण्ठोदरशिरो वक्षो बाहुकोर्प्पर पाणयः ।
कटि जङ्घे महाङ्गानि जीर्णेचैव तु कारयेत् ॥
राजराष्ट्रस्य नाशञ्च भूपतिस्त्वन्यथा भवेत् ।
जीर्णबेरन्तु योजित्वा तत् बेरं कुम्भमावहयेत् ॥
तद्द्रव्यं तत्प्रमाणेन तत् बिम्बं पूर्वतो भवेत् ।
संप्रोक्षणं ततः कृत्वा प्रतिष्ठां कारये त्ततः ॥
171b अङ्गहीने तु यत् प्रोक्तं श्रुतं भयं त्वामवासिनाम् ।
नेत्रञ्च नासिकोष्ठञ्च तालं चैव तु कारयेत् ॥
कर्णञ्चाङ्गुले मङ्गानि पुनस्सन्धान माचरेत् ।
संप्रोक्षणं ततः कृत्वा तिथिवारं विनाचरेत् ॥
अधिवासनादियत्सर्वं सद्यः कर्म समाचरेत् ।
केशरोम नखार्तौ च जटामालन्दु शेखरम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिरसो भूषणं ह्येतद्वपाङ्गञ्चैव हीनके ।

तद्ग्रामनृपतेर्देहे दुःखशोकभयावहम् ॥

पूर्वं सन्धानकं कृत्वा संप्रोक्षणमथाचरेत् ।

पादुकावाहनादीनि लेपनन्नरवाहनम् ॥

नागरन्ध्रमर्पयस्मात् मकुटं भूषणाक्षरैः ।

वन्नवीरं च शाङ्खं च हरिणं टङ्कं कुन्तकम् ॥

कल्हार मडीमाल्यानि पाशपत्मायुधान्यपि ।

पीठं प्रभाञ्च चक्रञ्च प्रत्यङ्गञ्च विहीनके ॥

राजवाहनहीनञ्च चतुरङ्गविहीनकः ।

विशेषालङ्कृतीनाञ्च नाशनं भवति ध्रुवम् ॥

पुनस्सन्धानकं कृत्वा संप्रोक्षणमथाचरेत् ।

अंशुमती

272a उत्तमाङ्गविहीने च भूषणास्त्रविहीनके ।

उत्तमाङ्गविहीने तु बालबिम्बप्रकल्पयेत् ॥

बेराङ्गहीने भिन्ने वा बेरमात्रं परित्यजेत् ।

पीठाङ्गहीने भिन्ने वा पीठमात्रं परित्यजेत् ॥

कामिके

बेरे शिलामये मार्द्रे पक्वे पार्श्वे विरत्नजे । ?

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पश्चिमशाखास्य रेखादौ हीनो तु परिवर्जयेत् ।
अङ्गहीने तु सत्याज्य मित्यङ्गनापि चारणा ॥ ?
लोहजे मृण्मये वेरे हस्तनास्याङ्घ्रि भूषणैः ।
कर्णदन्तादि हीने तु दन्तद्रव्यैर्द्दृढन्नयेत् ॥
उत्तमाङ्गविहीने तु त्यक्त्वान्यं योजयेन्नवम् ।
प्रत्यङ्गहीने त्याज्यं वा सन्धानं वा समाचरेत् ॥ ?

कारणे

भ्रूरेखा पश्चिमरेखा च आस्यरेखा च नासिका ।
शाखमङ्गशयं दृष्ट्वा प्रतिमाञ्च विवर्जयेत् ॥
महाङ्गोपाङ्ग प्रत्यङ्ग शयं दृष्ट्वा विशोषतः ।
अङ्गहीने प्रकर्त्तव्यं त्यक्त्वा बिम्बं प्रयत्नतः ॥
उपाङ्गहीने कर्त्तव्यं पुनस्सन्धानमाचरेत् ।
प्रत्यङ्गादि समायुक्तमेवमेवक्रमेण तु ॥
शिलादारुमयञ्चैव मृण्मयञ्चैव वर्जयेत् ।
172b शिला ग्रहणपूर्वेण बिम्बानां पूर्ववन्नयेत् ॥
लोहजञ्च द्विक्षोभेण तद्द्रव्यैस्तत्प्रमाणकम् ।
मानोत्कृष्टं प्रकर्त्तव्यं मानहीनं न विद्यते ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अर्जिते तु

लोहजानां तु बेराणां शिरोहीनन्तु यत् भवेत् ।

तेन लोहेन तद्रूपमन्यैर्वापि प्रकल्पयेत् ॥

अङ्गोपाङ्गादिवैकल्ये सन्धियोग्यन्तु यत् भवेत् ।

सन्धिं तत्र प्रयुञ्जीत ततः प्रोक्षणमाचरेत् ॥

अर्वाग्दशाहनः कर्तुं मुहूर्तं नाप्यनुद्धृतम् ।

शक्यते तत्र तद्बेरं कुम्भे विन्यस्य कारयेत् ॥

तस्मादूर्ध्वं तथा पीठे समावाह्य प्रकल्पयेत् । इति

चित्रबेरस्य यथा अंशुमती -

चित्रबेरे विच्छिन्ने पुनस्सन्धानमाचरेत् ।

चर्मच्छेदे यवारज्जुच्छेदने कल्कभिन्नके ॥

वर्णविन्यासहीने च पूर्वद्रव्येण कारयेत् ।

प्रधानाङ्गविहीने तु सहसा ह्यपज्यदे शोकः ॥

173a चित्रे दारुमयं कीलं लोहजं रत्नजन्तु वा ।

स्थापितं यदि यद्बेरं पूजितं जीर्णमेव वा ॥

छिन्नं वाप्यथ भग्नं वा दग्धं वा तं परित्यजेत् ।

कुड्यचित्रस्य जीर्णे तु स्थाप्यं तद्वर्णहीनकम् ॥

वर्णहीने शिलाजीर्णे लोहजं स्थापयेद्बुधः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लोहबेरस्य जीर्णे तु रत्नजं स्थाप्य पूजयेत् ।
रत्नबेरस्य जीर्णे तु रत्नमेव प्रकल्पयेत् ॥
सर्वं क्रमेणासंस्थाप्य पूजयेद्विधिवत्मना ।
पूर्वद्रव्येण वा कुर्यात् पूर्वाकृतिर्यथा तथा ॥
द्र०योत्कृष्टे नवा कुर्यात् पूर्वमानेन देशिकः ।
इष्टिकायावरं कुड्यं चित्रमाभासवर्जितम् ॥
आभासादिष्टका गर्भं चित्रमेव विशिष्यते ।
अश्मनो लोहजं श्रेष्ठं लोहाद्रत्नं विशिष्यते ॥
रत्ने रत्नं प्रकर्त्तव्यं मपरन्तु न कारयेत् ।
बेरपीठजीर्णोद्धार उच्यते यथा अंशुमतौ -
जीर्णबेरासनं गृह्य गर्भं श्वभ्रबलान्वितम् ।
173b अबलं श्वभ्रयुक्तं चेत् नवं तद्द्र०येण कारयेत् ॥
इष्टकागर्भपीठोर्ध्वे दारुगर्भं प्रतिष्ठितम् ।
दारुगर्भासने स्थाप्यं शिलागर्भं यथादृढम् ॥
शिलागर्भस्य पीठोर्ध्वे स्थाप्यं केवलशैलजम् ।
लोहबेरं शिलापीठे स्थापयेन्नकदाचनम् ॥
लोहजे लोहजं पीठं स्थापयेत्तु विचक्षणम् ।
रत्नजे लोहपीठं वा रत्नजं वापि कारयेदिति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अथ शूलोद्धार उच्यते कारणे
शूले च पतिते चैव चलिते वाङ्गहीनके ।
अग्निकावर्णहीने च चर्मच्छेदे तथैव च ॥
पीठबन्धविहीने च ग्रामनाङ्गाविनिर्दिशेत् ।
पतिते चलिते चैव बालस्थानन्तु कारयेत् ॥
शूलन्तु स्थापयेत् पश्चात् पूर्वोक्तविधिना सह ।
बेरन्तु विधिवत्कृत्वा संप्रोक्षणमथाचरेत् ।
अङ्गोपाङ्गप्रत्यङ्गं शूलं त्रिविधमुच्यते ॥
अङ्गप्रधानशूलं स्यात् ब्रह्मदण्डं इहोच्यते ।
वक्षोदण्डकटीदण्ड बाहुकोर्पर दण्डकम् ॥
ऊरुश्च जानुजङ्घे च उपाङ्गमिति कीर्तितम् ।
क्रोबाणिन्तु विजानीयात् प्रत्यङ्गमिति बुद्धिमान् ॥
74a ब्रह्मदण्डविहीनञ्चेच्छूलस्थापनमाचरेत् ।
प्रत्यङ्गोपाङ्गहीने च पुनस्सन्धानकं कुरु ॥
कामिके
पूर्वसंस्थापितो ब्रह्मदण्डश्चेल्लक्षणान्वितम् ।
तमेव स्थापयेत्तत्र पुनरापादनं विना ॥
अङ्गादीनां समुत्पत्तौ पुनस्संस्थापनन्नयेत् । इति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सिद्धान्तजीर्णोद्धारो यथा कामिके -
जीर्णाङ्गं स्वसिद्धान्त पुस्तकन्तत्पुरातनम्।
अग्निकुण्डे तु होतव्यं हुत्वाघोरशतं जपेत् ॥ इति
शैवप्रतिमादीनां जीर्णकृत्यमुक्त्वा प्रतिष्ठा-
विधिमाह । आगमोक्तेन विधिना आगमोक्त
क्रियाकलापमार्गेण कुर्यात् । तत्प्रकारस्त्वजिते -
तत्र पूर्वन्तु देवाग्रे स्थण्डिले विधिवत्कृते ।
स्थाप्य कुम्भं दृढं रम्यं सितसूत्रविचित्रितम् ॥
गन्धोदपूरितं स्वर्णकूर्चयुक्तन्तु वाससा ।
वेष्टितं सापिधानं च तदग्रे स्थण्डिले कृते ॥
सैकते विधिवत्कृत्वा यात्राहोममनन्तरम् ।
ततः कुम्भे समावाह्य देवं मूलमनुं स्मरन् ॥
गन्धपुष्पादिभिस्सम्यगर्चयित्वा विधानतः ।
1714b सुगुप्तेन्यत्र देशे तु / कुम्भं संस्थापयेत्सुधीः ॥
पीठं चेदत्र पीठे तु कुम्भे मन्त्रन्तु पूर्ववत् ।
विन्यस्य तत्र देवस्य पूजां प्रत्यहमाचरेत् ॥
प्रवेशोपि पुरा कृत्वा यात्राहोमं विधानतः ।
कुम्भं पार्श्वे समुद्धृत्य कृत्वा धामप्रदक्षिणम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अन्तः प्रविश्य बेराग्रे स्थण्डिले विधिवत्कृते ।
स्थाप्य पुण्याहपूर्वन्तु तत्र देवं समर्चयेत् ॥
ततः कुम्भाच्चितन्तेन मन्त्रेण प्रतिमाहृदि ।
विन्यस्य मन्त्रकल्पन्तु देवमङ्के स्समाथुतम् ॥
तस्याग्रे शान्तिहोमन्तु ततः कुर्याद्वितानतः ।
पीठञ्चैतत् तत् समीपे तु स्थण्डिले विधिवत् कृते ॥
स्थाप्य कुम्भं यथापूर्वं पीठमभ्यर्च्य देवताम् ।
यात्राहोमं ततः कृत्वा पीठाद्वावहयेत्ततः ॥
अम्भे साङ्गन्तु तं देवं कुम्भमुद्धृत्य विन्यसेत् ।
वेद्यां संप्रोक्षणार्थाय निर्मिते मण्डपे सुधीः ॥
पीठञ्च प्रक्षिपेत्तोये प्रोक्षणं कारयेत्ततः ।
अयञ्च सकलसम्प्रोक्षण विधिः कारणे प्रतिपादितः ।
175a पूर्वपक्षे तु पुण्यर्क्षे यजमानानुकूलके ।
अङ्कुराण्यर्पयेत्पूर्वं प्रोक्षणादिविशेषतः ॥
प्रासादस्याग्रके वापि याम्ये वा वावके थवा ।
ऐशान्यां पश्चिमे वापि मण्डपन्तु युगाश्रकम् ॥
नवसप्तपञ्चहस्तं वा उत्तमं मध्यमाधमम् ।
षोडशस्तम्भसंयुक्तं युगद्वारसमन्वितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वोक्तलक्षणैर्युक्तं चतुस्तोरणभूषितम्।
मण्डपे नवभागेन मध्ये वेदीं प्रकल्पयेत् ॥
अरत्निमात्रकोच्छ्रायं षोडशाङ्गुलमेव वा।
गोमयालेपनं कृत्वा दर्पणोदरसन्निभम् ॥
कुण्डानि परितः कुर्यात् मानुषे तु पदे क्रमात्।
नवाग्निं वाथ पञ्चाग्निमेकाग्निं वा विशेषतः॥
दिक्षासु चतुरश्राणि विदिक्षास्वब्ज कुण्डकम्।
शक्रशाङ्करयोर्मध्ये वृत्तं प्राधानकं कुरु ॥
पञ्चाग्न्यायतनं चेत्तु अब्जकुण्डं विवर्जयेत्।
प्रत्येकं व्याहृतिं हुत्वा जयान्तत्रैव योजयेत् ॥
175 b पूर्णाहुतिं ततो हुत्वा मूर्तिमन्त्रेण हूयते।
जयादिरभ्याधानञ्च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
स्विष्टमग्ने इति मन्त्रेण जुहुयात्तदनन्तरम्।
वास्तुहोमं ततः कुर्यात् समरीच्यपदेषु तु ॥
गन्धपुष्पञ्च धूपञ्च दीपमर्घ्यं हृदार्चयेत्।
वेदीसन्ध्ये तथोद्धृत्य स्नानवेद्यान्निवेशयेत् ॥
सद्योजातेन मन्त्रेण आवाहनं प्रकल्पयेत्।
वामदेवेन संस्थाप्य अघोरेणैव तस्य तु ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पाद्यमाचमनं चार्घ्यं वामदेवेन दापयेत् ।
अष्टत्रिंशत्कलायोगं महेशबीजं हृदि न्यसेत् ॥
प्राणप्रतिष्ठामन्त्रेण हृदयेन तु चिन्तयेत् ।
वेदिकाकुम्भमुद्धृत्य ईशानेनाभिषेचयेत् ॥
गौरीगायत्रीमन्त्रेण शान्तिकुम्भाभिषेचयेत् ।
घृतशिरोर्पणं सूक्ष्मे प्रतिपादितम्

तद्यथा

घृतशिरोर्पणं वक्ष्ये शृणु त्वं तत्प्रभञ्जन ।
शूलाभिषेकं पूर्वं वा चूर्णोत्सवस्य पूर्वके ॥
76a |घृतशिरोर्पणं कुर्यात् विधिनानेन बुद्धिमान् ।
प्रासादस्यैशादिभागे पश्चिमे चोत्तरेऽपि वा ॥
गोमयाल्लेपनं कृत्वा पिष्टचूर्णैर्विचित्रयेत् ।
पुण्याहं वाचयित्वाथ स्थानशुद्धिं ततः कुरु ॥
स्थण्डिलं कारयेद्धीमान्नाढकद्वयशालिभिः ।
अभ्यर्च्य गन्धपुष्पाद्यैः पूर्वोक्तविधिना सह ॥
दारुपीठं च तस्योर्ध्वे विन्यसेद्वस्त्रसंयुतम् ।
तण्डुलेन समापूर्य स्थालिकामुपरि न्यसेत् ॥
यथालाभं समानीय सुशुद्धं कापिलाघृतम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

होमादिपात्रे सङ्गृह्य विन्यसेत्तण्डुलोपरि ।
तत्पूर्वे हेमपुष्पञ्च दूर्वाग्रं दक्षिणे न्यसेत् ॥
अङ्कुरं पश्चिमे न्यस्त्वा चोत्तरे तु यवाक्षतम् ।
अर्चयेत् ब्रह्ममन्त्रेण गन्धपुष्पादिना बुधः ॥
घृतसूक्तं जपेत्पूर्वं मन्त्रं पञ्चाक्षरं तथा ।
176b घृतपात्रादिसर्वं वा वाहयेच्छिष्यमूर्द्धनि ॥
वामप्रदक्षिणं कृत्वा सर्वालङ्कारसंयुतम् ।
देवाग्रे स्थापयेद्विद्वान् घृतपात्रादिकं यथा ॥
पुण्याहं वाचयेत्तत्र आत्मानं त्रिस्वरूपकम् ।
भावयेत् गौरि हस्तञ्च दक्षपाणितले बुधः ॥
अभ्यर्च्य देवीं गायत्र्या गन्धमण्डलसंयुतम् ।
घृतं सङ्ग्राहयेद्विद्वान् करं संपूज्यमानसम् ॥
घृतं मिमिक्षिमन्त्रेण स्नावयेद्बिम्बमूर्द्धनि ।
शर्वं त्रिवारकं भक्त्या सामानित्य विधानवित् ॥
दूर्वाग्रं हेमपुष्पञ्च अङ्कुरञ्चाक्षतं क्रमात् ।
मूर्द्धि दोर्द्वन्द्व हृदये योजयेन्मूलमन्त्रतः ॥
शिवोऽहं भावयेद्विद्वान् गौर्याश्चैव विधानतः ।
धूपदीपं ततो दत्वा क्षमस्वेति प्रणामयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

177a सर्वमङ्ग । ... यादिरेवं स्थूलाग्रोरोप्यगमम् । इति
अथ गौरीबिम्बानां जीर्णोद्धार विषये गौरीसङ्कोचः
कर्तव्यः । तद्विधानञ्च सूक्ष्मे
गौरीसङ्कोचनं वक्ष्ये शृणुत्वन्तत्प्रभञ्जन ।
आयुरारोग्यजयदं पुत्रपौत्रसमृद्धिदम् ॥
आद्यं द्वितीयमेवन्तु द्विविधं तरुणालयम् ।
कर्षणाद्यर्चनान्तेतु तरुणालयसङ्ग्रहम् ॥
प्रासादे पतिते भिन्ने लिङ्गे च चलिते तथा ।
अन्यानि सर्वकर्माणि भाषितानि समानि च ॥
देवबालगृहञ्चेन्तु युगाश्रं परिकल्पयेत् ।
देव्यामायताश्रं स्यात् कल्पयेत्तु यथाक्रमम् ॥
बाललिङ्गविधिस्त्वेवं बालदेवीविधिं शृणु ।
देवोक्तमार्गवत् कर्म देव्याश्चापि समाचरेत् ॥
मन्त्रभेदो भवेत्तत्र क्रियाभेदो न विद्यते ।
177b कामकोष्ठाश्रके वापि दक्षिणे चोत्तरेपि वा ॥
ऐशे वा पश्चिमे वापि गौरीबालगृहं भवेत् ।
देवबालगृहे वापि स्थापयेत् बालरूपिणीम् ॥
संपूज्याग्निं वपूजान्ते बालहोमादिकं विना ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पृथक् बालगृहं चेत्तु देवी पूर्वोक्तमार्गतः ।
समभ्यर्च्य महादेवीं मन्त्रेणैव तु देशिकः ॥
क्रोडवारावसाने वा उत्तरारोपणान्तके ।
मूर्द्धेष्टकावसाने वा प्रोक्षणं सम्यगाचरेत् ॥
किञ्चिद्दोषविशेषोऽस्ति शृणुत्वं तत्प्रभञ्जन ।
देवीबालप्रतिष्ठाये देवस्य तरुणालये ॥
देवालये समापाद्य गौरीं संस्थापयेद्ध्रुवः ।
शिवस्य प्रोक्षणं कृत्वा ततः कल्याणमाचरेत् ॥
178 a गौरीसंस्नपनात्पूर्वं शिवस्य प्रोक्षणं भवेत् ।
तदा बालालये गौरीं समाकृष्य शिवालये ॥
देवाग्रे मण्डपे त्वीशे नैरृते वायुगोचरे ।
दक्षिणे चोत्तरे स्थाप्य पूर्वमार्गेण देशिकः ॥
प्रदक्षिणजलवास नयनोन्मीलनक्रमम् ।
अङ्कुरं कौतुकं चैव स्पर्शनं कौतुकं विना ॥
देव्यग्रे स्थण्डिलं कृत्वा शिवाग्निं विधिनानयेत् ।
गौरीमावाह्य तन्मन्त्रैः मूलेनैव शतं हुनेत् ॥
अघोरेण शतं हुत्वा सामिदाज्येन देशिकः ।
होमान्ते स्थापयेत् गौरीं पूर्ववर्णितवर्त्मना ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवालयं समाप्नोतु प्रोक्षणं सम्यगाचरेत् ।
पूजयित्वा विधानेन पश्चात् कल्याणमाचरेत् ॥ इति

ननु उक्तोयं प्रतिमाजीर्णोद्धारः शैवप्रतिमाना-
मेव । विनायकस्कन्दादि परिवाराणां कथमिति
चेत् । उच्यते । सर्वत्रापि आलयोक्त जीर्णोद्धार
178b प्रकारेणालयस्य प्रतिमोक्तप्रकारेणैव प्रतिमानाम् ।
तथाचोक्तं कारणे

परिवारालये जीर्णे आलयस्योक्तवत्कुरु ।
सर्वकृत्या पुनः कुर्यात् लक्षणेन विचक्षणः ॥
अन्यकृत्याकृतं चेत्तु सर्वदोषसमुद्भवेत् ।
स्थापकोनोक्त देशे तु तद्विनाशम तन्त्रकैः ॥
उक्तस्थाने प्रकर्तव्यं परिवारादिकं क्रमात् ।
जीर्णिते चात्र बिम्बन्तु उत्तरोत्तर विशेषतः ॥
तत्तद्धामाग्रके पीठं कृत्वा मूर्तिं समर्चयेत् ।
स्थापनोक्त क्रमेणैव बिम्बं वै स्थापयेन्नवम् ॥ इति

एवं जीर्णोद्धारप्रकारं सर्वमुक्त्वा तत्फलमाह ।
इष्टप्राप्त्यै इति तानि च इष्टानि च

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वज्ञानोत्तरे प्रतिपादितानि यथा -

सर्व यज्ञतपोदान सर्वतीर्थेषु यत्फलम् ।
तत्फलं कोटिगुणितं स्थाप्यालिङ्गं लभेन्नरः ॥
1794 योलिङ्गं स्थापयेद्देवं विधिपूर्वं सदाशिवम् ।
सर्वागमोदितं पुण्यं कोटिकोटिगुणं भवेत् ॥
पितृजन्मान्तरजं बाधे यतश्चोद्धृते स्त्रियम् ।
कुलैकविंशमुद्धृत्य ततो गच्छेत् परां गतिम् ॥
अज्ञात्वा विधिवच्छास्त्रं कुरुते यस्तु लोभतः ।
कर्तारं च तथात्मानं इहामात्रञ्च नाशयेत् ॥
तस्मात् सर्वप्रयत्नेन विधिवत् कारयेद्बुधः ।
कर्ता कारयिता चैव ततो याति परां गतिम् ॥

अंशुमति

आयुष्करं पुष्टिकरं श्रीकरञ्च यशस्करम् ।
सर्वसंपत्करं चैव सर्वपापविनाशनम् ॥
सायुज्यं लभते सत्यं पुनर्जन्म न विद्यते ।

कारणे

एवं यः कुरुते मर्त्यो लभते मौलिकं फलम् ।
इहैव पुत्रवान् श्रीमान् सोऽन्ते सायुज्यमाप्नुयात् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परमशिवमुदमुहुः परिविमृश्य शैवागमान्यथा ।
मतिमयाकृतं शिवकृपाकटाक्षश्रिया ॥
परीक्ष्यच्च परिग्रहं वितनुतामिति प्रार्थये ।
नवाच्यमहसज्ञान स्वशिशु वाङ्नोदायकोम् ॥

॥ इति जीर्णोद्धारे त्रितीयपरिच्छेदः ॥

॥ इति जीर्णोद्धार दशक व्याख्याने समाप्तम् ॥

श्वेतारण्येश्वराय नमः ॥ श्री ब्रह्मविद्यायै नमः ॥

अघोरेश्वराय नमः ॥

अघोर भुवनेय नटनायकाभ्यां नमः ॥

श्री शिवकाम सुन्दरीसमेत देवनायकाय नमः ॥

श्री वेणुभुजनायकीसमेत श्वेतारण्येश्वराय नमः ॥

सुब्रह्मण्याय नमः ॥ अस्मत् गुरुभ्यो नमः ॥

ब्रह्मविद्यासहायम् ॥

अविरलकृतवर्णाश्लेषणं पुस्तकेऽस्मिन् -
ल्लिखितमनवसानाल्लेखनीदूषणं वा ।
अनुचितमथवास्यात् वक्रतोपर्णराजो
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

॥ शुभमस्तु ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.